अध्यात्मतत्त्वालोकः ।

कर्त्ता--

न्यायविजयः ।

लोकमान्य-महर्षिश्रीविजयधर्मसूरिपादेभ्यो नमः ।

अध्यात्मतत्त्वालोकः ।

रचयिता—

न्यायविशारद-न्यायतीर्थमुनिश्रीन्यायविजयः ।

वीर सं. २४४६.] [सं. १९७६.

છાપનાર—
વિઠ્ઠલભાઇ આશારામ ઠક્કર.
લુહાણામિત્ર સ્ટીમ પ્રેસ,
શિયાપુરા–વડોદરા.
તા. ૨૦–૫–૨૦

शास्त्रविशारद—जैनाचार्य श्रीविजयधर्मसूरि,
ए. एम. ए. एस. बी.

Shāstra Vishārada Jainācharya **Shri Vijaya Dharma Suriji**

ये गीयन्ते सकलसमयज्ञत्व-सत्संयमाभ्या-
मेतद्देशैः परजनपदैः कोविदैरग्रगण्यैः ।
तेषां जनाम्बरदिनकृतां सूरिचूडामणीना-
मेषां पाणौ लघुकृतिमिमामुत्सृजामि प्रणम्रः॥

—लेखकः ।

प्रस्तावः ।

इदं हि सर्वेषां विदितम्- सर्वेऽपि प्राणभाजः सुखायैव स्पृहयन्ति चेष्टन्ते च । किं पुनरत्र कारणम्-प्रयतमाना अपि तदर्थं तद् नाप्नुवन्ति ? । महान् खल्वयं प्रश्नो महतो विचारानपेक्षते । यदि च कश्चिद् एवं वदेत्- " दृश्यन्त एव पृथिवी-पीठे तथाविधाः श्रीमन्तो विद्वांसो यशस्विनो वा सुखिनः," न तर्हि तदीया मतिर्भ्रान्ता । शोक-परितापेन समग्रसंसारवर्त्तिनां शरीरिणां व्याप्तत्वात् । न चोग्रशोक-तापसम्पृक्ताः सुखकणा भवन्ति सुखम् । वस्तुत ऐन्द्रियकविषयानुभवजनित-आह्लादः परितापमयत्वात् संक्लेशनिबन्धनत्वाच्च सुखमेव नार्हति भवितुम् । तस्मात् श्रीमत्त्वादिभिः सम्भाव्यमानाः सुखिनो न सन्ति सुखिनः, इति प्रतिपत्तव्यम् ।

कस्यापि वस्तुनः संसाधनं तत्-तत्कारणस्वरूपपरिचयं तदनुकूलप्रयत्नं च विना न भवतीति सुप्रसिद्धम् । एवं च सुखस्यापि लाभः, तत्-तत्कारणस्वरूपपरि-चय-तदनुकूलप्रयत्नत एव सम्पत्तुमर्हतीति सुप्रतिष्ठितम् । अथ परिभावनीयम्-संसारप्रपञ्चवर्त्तिनो देहिनः सुख-तत्कारणज्ञान-तदनुकूलप्रयत्नशालिनः सन्ति नवा ?। विचारमार्गप्रहीणेन चेतसा शक्यतेऽवधारयितुम्- जगदिदं वास्तवसुख-तत्कारणपरि-ज्ञानात् पराङ्मुखं तदनुकूलप्रयत्नाच्च दूरीभूतम् । इदमेव च कारणं यद् न लभन्ते सुखसम्पदं तदर्थिनस्तदुद्योगभाजोऽपि ।

ये च " सुखं किंस्वरूपम् , का च तत्सम्पादनपद्धतिः " इति यथावत् समवगच्छन्ति, ते विना तत्र यथात्मशक्ति प्रयत्नं कर्त्तुं न शक्नुवन्त्यवस्थातुम् । अतः प्रथमतः सुख-तत्साधनपरिज्ञानमेव प्रथमसाध्यतया दृष्टिसन्नक्षमुपतिष्ठते ।

एतत्परिज्ञानायैव हेतवे अयं ग्रन्थ उपनिबद्धः। न च तात्त्विकसुखस्योपदर्श-नम् , अतात्त्विकसुखस्य, तत्प्रयोजकविषयाणां तत्सम्बन्धिनां राग-द्वेष-मोहानां तत्संसर्गवतश्च व्यवहारप्रपञ्चस्य वैगुण्यपरिदर्शनेन विना शक्यते कर्त्तुम् । अतोऽना-दिसम्बन्धवतां सुखपरिपन्थिनां नैर्गुण्यप्रदर्शनमत्र ग्रन्थे महता विस्तरेण कर्त्तुमुचि-तममंसि । नहि अस्मद्गाढसंसृष्टानां सुखस्य प्रतिबन्धकानां दुष्टत्वभावनमन्तरेण शक्यते तत्सम्बन्धो व्यपनेतुम् । एवं च, " आत्मनः स्वरूपावस्थानं सुखम् " तत्साधनं

अध्यात्मभानौ प्रसरत्प्रतापे मनोनगर्य्यां परिभासमाने ।
कुतस्तमः ?, शुष्यति भोगपङ्कः, कषायचौरैः प्रपलाय्यते च ॥९॥

आनन्दपूर्णां च सुधां समाधिं वितन्वतेऽध्यात्मसुधाकराय ।
स्पृहा यदीये हृदि नाविरासीत् पशुर्नृरूपेण स मोघजन्मा ॥१०॥

योऽध्यात्मशास्त्रं वहते प्रतीक्षणं भवेद् भयं तस्य कुतस्त्रिलोक्याम् ? ।
तिरस्कृतो वा नितरां स्तुतो वा नाध्यात्मविद् रुष्यति मोदते च ११॥

विधाय पापान्यतिभीषणानि येऽनन्तदुःखातिथयो बभूवुः ।
एतादृशानप्युददीधरद् यत् किं वर्ण्यतेऽध्यात्मरसायनं तत् ? ॥१२॥

आत्मस्वरूपस्थितचित्तवृत्तेर्भवप्रपञ्चेषु तटस्थदृष्टेः ।
अध्यात्मराजेश्वरसुप्रसादे का न्यूनता सिद्धिषु लब्धिषु स्यात्? ॥१३॥

आत्माऽस्ति कर्माऽस्ति परो भवोऽस्ति मोक्षोऽस्ति तत्साधकहेतुरस्ति
इत्येवमन्तःकरणे विधेया दृढप्रतीतिः सुविचारणाभिः ॥ १४ ॥

अर्वाग्दृशां नैव परोक्षभावाः प्रत्यक्षधीगोचरतां लभन्ते ।
अतीन्द्रियज्ञानिकृतोपदेशैः सन्तो यथार्थं प्रतियन्ति किन्तु ॥१५॥

शुद्धाऽऽत्मतत्त्वं प्रविधाय लक्ष्यममूढदृष्ट्या क्रियते यदेव ।
अध्यात्ममेतत् प्रवदन्ति तज्ज्ञा नचाऽन्यदस्मादपवर्गबीजम् ॥१६॥

अध्यात्मभूमीभृत ऊर्ध्वभागे दार्ढ्येन यद्यस्ति व आरुरुक्षा ।
महाशयास्तर्ह्युपदिश्यमानं निबोधतेदं हृदयेन तावत् ॥ १७ ॥

महीयसा पुण्यसमुच्चयेन सम्पद्यते मर्त्यभवो विशिष्टः ।
सार्थक्यमेनं च नयन्ति सन्तः सज्ज्ञान-सम्यक्चरिते प्रपद्य ॥१८॥

प्राप्तान्यनन्तानि वपूंष्यनेन जीवेन मोहेन वशीकृतेन ।
मोहस्य सत्त्वे खलु देहलाभो देहे च लब्धे पुनरुग्रदुःखम् ॥१९॥

जन्मक्षणे वार्धकसंगमे च पञ्चत्वकाले नियतं हि दुःखम् ।
रोगादिजातानि पुनः कियन्ति दुःखानि मेयानि भवाम्बुराशौ ? २०॥

देहान्तरानागमनाय तस्माद् निघ्नन्ति मोहं मुनयः प्रयत्नैः।
मोहो हि संसारमहालयस्य स्तम्भः, समस्ताऽसुखवृक्षबीजम्॥२१॥

सर्वेऽपि दोषाः प्रभवन्ति मोहाद् मोहस्य नाशे नहि तत्प्रचारः।
इत्येवमध्यात्मवचोरहस्यं विवेकिनश्चेतसि धारयन्ति॥ २२॥

संसारभोगा विविधा अनेन जीवेन भुक्ता बहुशो महान्तः।
तथाप्यतृप्तो जडबुद्धिरेष तृप्त्यै नृभोगेषु विचेष्टते ही!॥ २३॥

रिक्तीकृतेऽप्यम्बुनिधौ निपीय तृषा न यस्योपशमं प्रयाता।
तृणाग्रभागस्थितवारिबिन्दुपानेन तृप्तिं किमसौ लभेत?॥ २४॥

नवा नवेच्छा सततं जनानां प्रादुर्भवन्ती सकलप्रतीता।
कर्तव्यकार्यौघसमाप्तिरत्र नास्त्येव तृष्णाऽस्खलितप्रचारात्॥२५॥

कार्यान्तरं नह्यवशिष्यते मे कार्यं विधायेदमिति स्वचित्ते।
कुर्वन् सुमेधा अपि तत्समाप्तौ कार्यान्तरं कर्तुमनाः पुनः स्यात्॥२६॥

पारं स्वयम्भूरमणाम्बुराशेः सम्प्राप्नुवानाः* प्रबलौजसोऽपि।
अपारतृष्णाम्बुधिलंघनाय कर्तुं प्रयासं न परिक्षमन्ते॥ २७॥

अखण्डभूमण्डलशासकत्वं न दुर्लभं दुर्लभमेतदेव।
तृष्णानिरासोपगतावकाशं सन्तोषरत्नं परमप्रभावम्॥ २८॥

न तत् सुखं बिभ्रति भूभुजोऽपि न तत् सुखं स्वर्गसदो न चेन्द्राः।
यस्मिन् सुखे तुष्टमनःप्रभूते विवेकिनो निर्गमयन्ति कालम्॥२९॥

कामोद्भवं शर्म यदस्ति लोके दिव्यं महच्छर्म पुनर्यदस्ति।
तृष्णाक्षयोद्भूतसुखश्रियस्तद् न षोडशीं नाम कलां लभेत॥३०॥

इहास्ति को नाम तथाविधो नः कुर्मो वयं यत्र ममत्वभावम्?।
सर्वेऽपि कर्माशयबन्धभाजः कस्योपकारं खलु कः करोतु?॥३१॥

सर्वे च तृष्णानलतापतप्ताः शक्नोति कः कस्य शमार्पणाय?।
सम्बन्धमप्यातनुमश्च केन? न क्वापि सम्बन्धफलोपलम्भः॥३२॥

---

* शक्ताः शानः।

सर्वे पराधीनतयैव सन्ति कः कं स्वतन्त्रं प्रविधातुमीष्टे ? ।
स्वयं दरिद्रो हि परं विधातुमाढ्यं कथङ्कारमलम्भविष्णुः? ॥३३॥

स्नेहस्य निष्पादन आदितस्तु श्राम्यत्यविच्छेदकृते च पश्चात् ।
एवं दशायां परिभज्यमाने स्नेहे भृशं ताम्यति मानवोऽयम् ॥३४॥

यत्प्रेम्णि चित्तं रमते त्वदीयमन्यत्र चित्तं रमते तदीयम् ।
कथं वृथा मुह्यसि तत् परत्र ? ह्येकपक्षः प्रमदाय रागः ॥३५॥

अनन्यसाधारणभावतः कस्त्वद्गोचरं प्रेम दधाति लोके ? ।
एवं न चेत् क्वापि न तर्हि धीमन्! स्नेहो विधातुं भवतास्ति युक्तः ।३६॥

यत्प्रेमजन्यं परितापमेषि तत्तापहानाभिमुखः स चेद् न ।
तत् तादृशं प्रेम विषस्य कुण्डं मत्वा परित्यज्य कुरुष्व तोषम् ॥३७॥

स्नेहो नहि स्थायितया क्वचित् स्यात् स्याद् यत्र तत्रापि भवेत् सुतीव्रम्।
एकस्य मृत्यावितरस्य दुःखं दुःखास्पदं प्रेम ततोऽस्त्यवश्यम् ॥३८॥

सर्वो जनः स्वार्थनिमग्नचेताः स्वार्थश्च सम्बन्धविधानदक्षः ।
प्रेमप्रदीपस्य स एव तैलं स्वार्थे समाप्ते खलु कः किमीयः ? ॥३९॥

पितेति मातेति सहोदरेति मित्रेति कर्मस्फुरणोपजातम् ।
अवास्तवं खल्वपि मन्दमेधाः सम्बन्धमात्मीयतया प्रवेत्ति ॥४०॥

यस्यास्ति वित्तं प्रचुरं तदीया भवन्ति सर्वे मृदुलस्वभावम् ।
दारिद्र्य आप्ते तु सहोदरोऽपि प्रेमी वयस्योऽपि पराङ्मुखः स्यात् ।४१।

न कोऽपि कस्यापि समस्ति लोके वृथैव मोहाद् व्यथते जनोऽयम् ।
अध्यात्मदृष्ट्या परिचिन्तयेच्चेद् निःसारमेतद् निखिलं प्रतीयात्॥४२॥

महालयाऽऽरामसुलोचनादि यद् बाह्यदृष्ट्या परिदृश्यमानम् ।
भवेद् विमोहाय, तदेव वस्तु वैराग्यलक्ष्म्यै पुनरात्मदृष्ट्या ॥४३॥

दुःखं विना किञ्चन दृश्यते न सुखस्य लेशोऽपि भवप्रपञ्चे ।
तथाप्यहो ! वैषयिकं प्रसंगं सुखस्वरूपं प्रविदन्ति मूढाः ॥ ४४ ॥

मरीचिकां वारितया विलोक्य मृगो यथा धावति भूरितृष्णः ।
भोगान् सुखत्वेन तथा विदित्वा तान् प्रत्यहो ! धावति देहधारी ४५॥

कस्तूरिकासौरभलुब्धचेता मृगो यथा धावति तन्निमित्तम् ।
न वेत्ति तु स्वोदरवर्तिनीं तां मूर्खस्तथा सौख्यकृते सुखात्मा ॥४६॥

वपुः क्षणध्वंसि विनश्वरी श्रीर्मृत्युः पुनः सन्निहितः सदैव ।
तस्मात् प्रमादं परिहाय धर्मे बद्धोद्यमः स्यात् सततं सुमेधाः ॥४७॥

प्रभातकाले दिनमध्यकाले सायं च काले खलु वैसदृश्यम् ।
पदार्थसार्थे परिदृश्यते तत् क्वार्थे वयं विश्वसिमो विचार्यम् ! ॥४८॥

नारी किमीया तनयः किमीयो मित्रं किमीयं पितरौ किमीयौ ? ।
गन्तव्यमेकाकिन एव *हीतः पुण्यं च पापं च परं सह स्यात् ॥४९॥

सम्बन्ध औपाधिक एष सर्वः संसारवासे वसतां जनानाम् ।
स्वभावसिद्धं परमार्थरूपं ज्ञानादिसम्बन्धमुपेक्षसे किम् ? ॥५०॥

गिरेर्गुहायां जलधेश्च मध्ये पातालभूमौ त्रिदशालये वा ।
क्वाप्येतु मृत्योस्तु भवेन्न गुप्तः स भूर्भुवःस्वस्त्रितयं हि शास्ति ॥५१॥

प्रचण्डदोर्दण्डबलव्यपास्तजगद्बला दुःसहतेजउग्राः ।
प्रशासति स्म क्षितिमण्डलं ये तेऽपि प्रयाताः खलु रिक्तहस्ताः॥५२॥

जेगीयते स्मेन्दुमयूखशुभ्रं यशो यदीयं पृथिवीतलेऽस्मिन् ।
महाभुजास्तेऽपि हता यमेन व्यादाय वक्त्रं सहसा प्रसुप्ताः ॥५३॥

महालयोऽयं धनकोश एष इमाः सुमुख्यः परिवार एषः ।
ध्यायन्निति त्वं भवसि प्रफुल्लो दृशोस्तु सम्मीलितयोर्न किञ्चित् ।५४।

अनेन देहेन करिष्यसे यत् पुण्यं तदन्यत्र भवे सहायः ।
गमिष्यतस्ते भविता, न तु स्वात् परिच्छदादेकतमोऽपि कश्चित् ।५५

चित्रात् तक्राक्षकनालिकेरश्चिन्तामणिः कामगवी सुरद्रुः ।
प्राप्तं किमप्यन्यदलौकिकं वा किं तेन सिद्धिर्मरणे पुरःस्थे ? ॥५६॥

---

* हि इतः ।

अस्ति त्रिलोक्यामपि कःशरण्यो जीवस्य नानाविधदुःखभाजः ?।
धर्मः शरण्योऽपि न सेव्यते चेद् दुःखप्रहाणं लभतां कुतस्त्यम्?॥५७॥

संसारदावानलदाहतप्त आत्मैष धर्मोपवनं श्रयेच्चेत्।
क्व तर्हि दुःखानुभवावकाशः? कीदृक् तमो भास्वति भासमाने?॥५८॥

मातेव पुष्णाति पितेव पाति भ्रातेव च स्निह्यति मित्रवच्च।
प्रीणाति धर्मः परिषेवितस्तद् अनादरः साम्प्रतमस्य नैव ॥५९॥

सौस्थ्यं धनित्वं प्रतिभां यशश्च लब्ध्वा सुखस्यानुभवं करोषि।
यस्य प्रभावेण तमेव धर्ममुपेक्षमाणो नहि लज्जसे किम्? ॥६०॥

इच्छन्ति धर्मस्य फलं तु सर्वे कुर्वन्ति नामुं पुनरादरेण।
नेच्छन्ति पापस्य फलं तु केऽपि कुर्वन्ति पापं तु महादरेण ॥६१॥

इष्यन्त आम्रस्य फलानि चेत् तत् तद्रक्षणादि प्रविधेयमेव।
एवं च लक्ष्म्यादिफलाय कार्यां कुर्वन्त्यबोधा न हि धर्मरक्षाम्॥६२॥

सुखस्य मूलं खलु धर्म एवच्छिन्ने च मूले क्व फलोपलम्भः ?।
आरूढशाखाविनिकृन्तनं तद् यद् धर्ममुन्मुच्य सुखानुषङ्गः ॥६३॥

करोषि यत् त्वं वपुषः सदैव पोषाय चालङ्करणाय चेहाम्।
प्रतिग्रहः किं नु फलस्य देहाद् वितर्कितश्चेतसि वर्त्तते ते ? ॥६४॥

भुक्तानि भोज्यानि सुरोचकानि पीतानि पेयानि रसाद्भुतानि।
यदा बहिस्तात् क्षिपते शरीरं तदा विरूपत्वममीषु कीदृक्? ॥६५॥

रसायनं सेवतु* सर्वदापि भुङ्क्तां पुनः पौष्टिकभोजनानि।
तथापि नो नङ्क्ष्यति देहकुम्भे भस्मावशेषीभवनस्वभावः ॥६६॥

तैलेन सम्मर्दनतो यथावत् स्नानात् जलेनोत्तमगन्धिना च।
सुराघटादप्यतिनिन्द्य एष कायोऽशुचिः किं भविता पवित्रः?॥६७॥

रोगैः प्रपूर्णं भविनां शरीरमन्तःस्थितेष्वेषु जनो मदान्धः।
यदा बहिस्ते प्रकटीभवन्ति दीनाननः पश्यति दुःखमेव ॥६८॥

* 'सेव्' धातोः परस्मैपदित्वे सुलभाः शिष्टप्रयोगाः।

अद्याद् विपत्तिं सकृदेव योऽत्र भूयः कदाप्याद्रियते स नैव।
चित्रं पुनः सेव्यत एव देहो योऽनादिकालाद् ददद‌स्ति दुःखम्॥६९॥

तस्मात् परित्यज्य शरीरमोहं चित्तस्य शुद्ध्यै सततं यतस्व।
न देहशुद्धौ पुरुषार्थसिद्धिश्चित्ते तु शुद्धे पुरुषार्थसिद्धिः ॥७०॥

अन्यत्र मोक्षाद् नहि वास्तवं शं मोक्षश्च देहश्च मिथो विरुद्धौ।
मुमुक्षवस्तेन न देहमोहं कुर्वन्ति, कुर्वन्ति बुभुक्षवस्तु ॥ ७१ ॥

येनैव देहेन विवेकहीनाः संसारबीजं परिपोषयन्ति।
तेनैव देहेन विवेकभाजः संसारबीजं परिशोषयन्ति ॥ ७२ ॥

मिष्टान्नभोगं कुरुतः समानं द्वौ पूरुषावेकतरस्तु तत्र।
बध्नाति कर्माणि, निहन्ति चान्यो मोहे विवेके च विजृम्भमाणे॥७३॥

चेद् धावतो जीववधो न जातो जातः पुनः पश्यत एव यातः।
तथापि हिंसाफलमादिमे स्याद् मूढे, द्वितीये न धृतोपयोगे ॥७४॥

शरीरमेवाऽऽत्मतया विदन्तो विदन्ति नैतत् खलु-"कोऽहमस्मि"।
इदं जगत् विस्मृतवत् स्वमेव स्वस्मिन् भ्रमः स्फूर्जति कीदृशोऽयम्?
॥ ७५ ॥

रागं च रोषं च परत्र कृत्वा कथं वृथा हारयसे भवं भोः!।
माध्यस्थ्यमेवाऽऽश्रय चेत् सुखेच्छा माध्यस्थ्यजं शर्म परानपेक्षम्
॥ ७६ ॥

परोन्नतौ किं परिखिद्यसे त्वं परक्षतौ किं वहसे प्रमोदम्?।
स्पृशन्ति नान्यं तव दुर्विकल्पास्त्वामेव बध्नन्ति तु कर्मपाशैः ॥७७॥

परोन्नतौ चेत् तव दुष्प्रयत्नैः क्षतिर्भवेत् कस्तव तत्र लाभः?।
न स्यात् क्षतिस्तर्ह्यपि को नु लाभस्तत्तापहेतून् त्यज दुर्विकल्पान्॥७८॥

जागर्त्ति पुण्यं प्रबलं यदीयं प्रवर्धमानेऽभ्युदये तदीये।
कोऽस्त्यन्यथाकर्त्तुमलं सुरोऽपि नेर्ष्यां ततः क्वापि करोतु धीमान्
॥ ७९ ॥

अभ्युन्नतिश्चावनतिश्च यत् स्यात् पुण्यस्य पापस्य च कार्यमेतत् ।
क्षीणे च पुण्येऽभ्युदयो व्यपैति तन्नश्वरे शर्मणि को विमोहः? ॥८०॥

संवेद्यते यत् सुखमद्वितीयं कदापि माध्यस्थ्यलवोपलम्भे ।
प्रशस्तकर्मौघजसौख्यराशिरप्यस्य नैवाऽर्हति तुल्यभावम् ॥८१॥

ऐश्वर्यमालोक्य भुवां विचित्रं चित्रीयसे मुह्यसि वा कथं त्वम्? ।
न किंश्चिदेतत् सुरसम्पदोऽग्रे विपाक एवाऽस्ति च कर्मणोऽसौ ॥८२॥

इन्द्राः सुरा भूमिभुजः प्रधाना महाप्रतापा अधिकारिणश्च ।
सर्वेऽपि कर्मप्रभवा भवन्ति कस्तत् सतां कर्मफले विमोहः?॥८३॥

सदा निरीक्षेत निजं चरित्रं यच्छुद्धिमाप्नोति विहीयते वा ।
हानिं च वृद्धिं च धनस्य पश्यन् जडश्चरित्रे न दृशं करोति ॥८४॥

करोषि दृष्टिं न गुणे परस्य दोषान् ग्रहीतुं तु सदाऽसि सज्जः ।
युक्तं न ते शूकरवत् पुरीषे परस्य दोषे रमणं विधातुम् ॥८५॥

दोषानुबद्धः सकलोऽपि लोको निर्दूषणस्त्वस्ति स वीतरागः ।
न किं पुनः पश्यसि दह्यमानमहो! स्वयोरेव पदोरधस्तात्॥८६॥

वृथाऽन्यचिन्तां कथमातनोषि? वृथाऽन्यकार्ये किमुपस्थितः स्याः?।
किं धूमपुञ्जं यतसे ग्रहीतुं विस्तारयन् चेतसि दुर्विकल्पान् ॥८७॥

बिभेषि दुःखाद् यदि साधुबुद्धे! दुःखानुकूलां त्यज दुष्प्रवृत्तिम् ।
नेष्टो वियोगः सुखसम्पदश्चेत् चरित्रमापादय तर्हि शुद्धिम् ॥ ८८ ॥

सुखं च दुःखं च शरीरिपृष्ठे लग्ने सदा कर्मविचित्रतातः ।
मत्तो न तु स्यात् सुखसम्प्रयोगे न व्याकुलःस्याच्च विपत्प्रयोगे॥८९॥

निशाविरामे दिनमभ्युदेति दिने समाप्ते च निशोपयाति ।
तथैव विश्वे सुख-दुःखचक्रं ज्ञात्वा सुधीः स्याद् न कदाप्यधीरः ९०॥

उदेति रक्तोऽस्तमुपैति रक्तः सहस्रभानुर्विदितो यथैषः ।
तथा महान्तोऽपि महोदयत्वे विपत्प्रसंगे पुनरेकरूपाः ॥९१॥

स्वर्णं यथा शुध्यति वह्नितापाद् विपत्प्रसंगेऽपि तथा महात्मा ।
विपत्प्रसंगः खलु सत्त्वहेम्नः परीक्षणे स्यात् कषपट्टिकेव ॥९२॥

प्राप्ता विपत्तिर्नियमेन भोग्या दुर्ध्यानतो नैव निवार्यते सा ।
एवं च शान्त्या विपदं सहेत दुर्ध्यानतः प्रत्युत कर्मबन्धः ॥९३॥

किं भोः ! प्रयासादपि वाञ्छितार्थाऽसिद्धेर्भृशं ताम्यसि रोदिषि त्वम्?।
किं साम्प्रतं स्याद् रुदितेन ?, पूर्वं पापप्रवृत्तौ न विचारितं किम्?॥९४॥

अध्यात्मविद्यारमणैकलीनाः स्वरूपलाभाय सदा यतन्ते ।
स्वरूपलाभे सति नास्ति किञ्चित् प्राप्तव्यमित्यात्ममुखः सदा स्यात्॥
॥९५॥

अयं जनो मातृमुखः शिशुत्वे तारुण्यकाले तरुणीमुखश्च ।
जराऽऽगमे पुत्रमुखः पुनः स्याद् मूर्खः कदाप्यात्ममुखस्तु न स्यात् ।९६।

आदौ भवेच्छूकरवत् पुरीषे ततः पुनर्मन्मथगर्दभः स्यात् ।
जरद्गवः स्यात् जरसः प्रहारे पुमान् पुनर्नैव पुमान् कदापि ॥९७॥

लाभार्थमाध्यात्मिकजीवनस्य देवा अपीच्छन्ति नृजन्म लब्धुम् ।
तदेव किं त्वं मलिनीकरोषि प्रमादपङ्के हृदि चेत किञ्चित् ॥९८॥

जीर्णा जरा किं मरणं गतं किं रोगा हताः किं युवता स्थिरा किम्।
किं सम्पदो वर्जितविप्रयोगा यन्निर्विशंको विषयानुषङ्गः ? ॥९९॥

पट्विन्द्रियत्वे वृढमानसत्वे सुस्थे च देहे पुरुषार्थसिद्धौ ।
यतस्व, वार्धक्य उपागते तु किञ्चिन्न कर्तुं प्रभविष्यसि त्वम् १००

कर्मोद्भवं नाटकमेतदस्ति क्षणाद् विलीनं शरदभ्रवत् स्यात् ।
स्फुटेप्यहो ! पुद्गलवैसदृश्ये मोहं कथं नोज्झसि बालबुद्धे ! ॥१०१॥

उपस्थिते कर्मणि दुर्विपाके राज्यादि सर्वं विलयं प्रयाति ।
क्षुत्क्षामकुक्षिप्रतिपूरणार्थं गृहे गृहे भिक्षितुमप्युपेयात् । ॥१०२॥

कर्मस्थितिर्यावदपेयुषी न भवेदवश्यं सुखदुःखसत्त्वम् ।
दुःखप्रहाणेन सुखं प्रपित्सोरकर्मकीभावमृते न पन्थाः ॥१०३॥

दुःखान्यपाराण्यनुभूय यत्र शरीरभाजो जनिमाप्नुवन्ति ।
विलोक्य तत् स्थानकमेव भूयो हृष्यन्ति, हा! दारुण एष कामः॥१०४॥

भवेन्मतिश्चेद् विषयानुषङ्गाऽतिरेकतः शाम्यति कामवेगः ।
तदेतदज्ञानविजृम्भितं ते वह्निर्घृतेनेव हि वर्धते सः ॥ १०५ ॥

प्रतिष्ठिता यत्र शरीरशक्तिरधिष्ठितो यत्र धियो विकासः ।
व्यवस्थिता यत्र सुरूप-कान्तिर्वीर्यं प्रतिघ्नन्ति जडास्तदेव १०६॥

वैराग्यपीयूषरसेन धौतमप्याशु चेतो मलिनं क्षणात् स्यात् ।
विकारहेतौ निकटं प्रयाते, कामो बलीयांश्चपलं च चेतः ॥१०७॥

किं तत्र, सिंहोपरि चाऽऽस्य देशाटनप्रतिज्ञापरिपूरणं यत् ।
*विकारहेतौ सति विक्रियन्ते न ये, त एव प्रभवो यथार्थाः ॥१०८॥

अपि त्रिलोकेऽस्खलितप्रतापं किं वर्णयामो मदनं पिशाचम् ।
महात्मनोऽपि स्फुरितप्रबोधान् योऽग्रे स्त्रियाः साञ्जलिकानकार्षीत्
॥१०९॥

मनो द्रढीयः प्रविधाय सत्त्वप्रतिष्ठवृत्तिर्विकसद्विवेकः ।
अध्यात्मचिन्तां विदधद् भवेच्चेत् किमस्य कुर्याद् मदनः शिखण्डी?
॥११०॥

यथा मनःसारथिरिन्द्रियाश्वान् प्रयुङ्क्त एवं विषयेषु यान्ति ।
निपातयन्त्याशु च तत्र जीवमतोऽधिकः कः परतन्त्रभावः?॥१११॥

स एव धीरो बलवान् स एव स एव विद्वान् स पुनर्मुनीन्द्रः ।
येनेन्द्रियाणामुपरि स्वसत्ता विस्तारिता मानसनिर्जयेन ॥११२॥

जितेन्द्रियं शान्तमनःप्रतिष्ठितं कषायमुक्तं ममताविवर्जितम् ।
उदासितारं समुपास्महे मुनिं स एव सारं लभते स्म जीवनात्॥११३॥

सुखं वाञ्छन् सर्वस्त्रिजगति तदर्थं प्रयतते
तथापि क्लेशौघान् सततमनुबोभोति विविधान् ।

---

* कुमारसम्भवगतश्लोकतृतीयपादेन पूर्त्तिः ।

तदेवं संसारं विषयविषदुःखैकगहनं
विदित्वा निःसंगीभवति रमते चाऽऽत्मनि बुधः ॥११४॥

पूर्णानन्दस्वभावः परमविभुरयं शुद्धचैतन्यरूपः
सर्वोद्भासिप्रकाशोऽहह तदपि जडैः कर्मभिः सम्प्रविश्य।
म्लानिं नीतो नितान्तं तदथ विमलतां नेतुमेनं यतध्वं
प्रागुक्तं चात्र भूयः स्मरत दृढतया कर्मभूमिः स मोहः॥११५॥

कृत्वा स्वस्थं हृदयकमलं मुक्तबाह्यप्रसङ्गं
शान्त्यारामे समुपविशतो–द्धर्तुमात्मानमेनम्।
मन्त्रं हंहो! कुरुत सुधियोऽनादितः पाशबद्धं
कः स्यात् स्वात्मोपरि हतदयो मूढधीशेखरोऽपि? ॥११६॥

इत्येवं गृहिणोऽपि चेतसि सदा सद्भावनाऽऽलम्बनाद्
अध्यात्मं रचयन्ति संविदधतः संसारकार्याण्यपि।
एतेनैव पथा च तेऽपि विषमाद् मुच्यन्त एतद्भवाद्
इत्येवं परिदर्शितः परिमितोऽध्यात्मोपदेशो मृदुः ॥११७॥

इति "प्रकीर्णक उपदेशः" प्रथमं प्रकरणम्।

द्वितीय-प्रकरणम् ।

पूर्वसेवा ।

न दुष्करो योगपथाधिरोहः किं दुष्करं तर्हि जगत्त्रयेऽपि ? ।
योगस्य भूमावधिरोहणार्थमादावुपायः परिदर्श्यतेऽयम् ॥ १ ॥

पूजा गुरूणामथ देवताया आचारशुद्धिस्तपसि प्रवृत्तिः ।
निःश्रेयसे द्वेषविवर्जितत्वमेषैव शास्त्रेऽकथि 'पूर्वसेवा' ॥ २ ॥

पिता च माता च कलागुरुश्च ज्ञातेयवृद्धाः पुनरेतदीयाः ।
धर्मोपदेशप्रवणा महान्तः सतां मतः श्रीगुरुवर्ग एषः ॥ ३ ॥

कर्त्तव्य एतस्य सदा प्रणामश्चित्तेऽप्यमुष्मिन् बहुमान एव ।
पुरोऽस्य सम्यग् विनयप्रवृत्तिर्नावर्णवादस्य निबोधनं च ॥ ४ ॥

आराध्यभावः प्रथमोऽस्ति पित्रोर्विमानयंस्तौ लघुधीर्बुधोऽपि ।
आराधयेद् धर्मगुरुक्रमौ किं नाबद्धमूलस्तरुरेधते हि ॥ ५ ॥

पुण्यैर्महद्भिर्गुरुदेवसेवा सम्प्राप्यते, तत्र नहि प्रमादः ।
कर्तुं क्षमो बुद्धिमतां कदापि कल्याणगङ्गाप्रभवोऽयमध्वा ॥ ६ ॥

अनादरं ये गुरुदेवतानां कुर्वन्ति, पात्रं खलु ते कृपायाः ।
अमी वराका निजकर्मदोषाहता यतः श्रेयसि प्रस्खलन्ति ॥७॥

चलश्रियै दास्यमुपैति यस्य तस्यावमानः परिषह्यते चेत् ।
न सह्यते तर्हि कथं गुरूणामप्यप्रिया भावुककारणं वाक् ? ॥८॥

प्रेम्णा बलाद् वा वनितावचांसि सत्कारमार्गेऽस्खलितं नयन्ति ।
वाचं हितां तत्रभवद्गुरूणां न मन्वते, कीदृश एष मोहः ? ॥ ९ ॥

अपक्षपाताः शुचितत्त्वबोधा महाव्रतेषु स्थिरतां दधानाः ।
असङ्गिनः शान्तिसुधोपभोगा धर्मोपदेशा गुरवोऽवसेयाः ॥१०॥

तथाविधाः श्रीगुरवो भवाब्धौ स्वयं तरीतुं न परं यतन्ते ।
उद्धर्तुमन्यानपि देहभाजः परोपकाराय सतां हि यत्नः ॥११॥

नृदेवयोगीन्द्रनतः स देव आत्मश्रियं संप्रतिपत्तुमिच्छोः ।
स्याद् वल्लभो वल्लभवस्तुतोऽपि योगोऽस्ति दूरे न दशोदृशी चेत्
॥ १२ ॥

यथार्थदेवत्वविनिश्चयस्याभावे प्रशस्ताशयतो गृहस्थैः ।
सर्वेऽपि देवाः परिपूजनीया नत्वाग्रहः साम्प्रतमज्ञतायाम् ॥१३।

शास्त्रेष्वपीदं विषये च चारिसंजीवनीचारनयो बभाषे ।
विशेषदृष्टौ च परत्र साम्याद् देवो यथार्थः परिषेवितव्यः ॥१४।

न रागरोषादिकदोषलेशो यत्रास्ति बुद्धिः सकलप्रकाशा ।
शुद्धस्वरूपः परमेश्वरोऽसौ सतां मतो 'देव'पदाभिधेयः ॥१५॥

रागेण रोषेण वयं प्रपूर्णास्तथैव देवोऽपि हि सम्भवेच्चेत् ।
कस्तत्र चास्मासु च तर्हि भेदो विवेक्तुमर्हन्ति बुधा यथावत् ॥१६॥

तस्मात् स देवः खलु वीतरागः प्रियोऽप्रियो वा नहि तस्य कश्चित् ।
रागादिसत्ताऽऽवरणानि नाम तद्वांश्च सर्वज्ञतया कुतः स्यात्?॥१७॥

वयं सरागाः प्रभुरस्तरागः किञ्चिज्ज्ञतास्मासु स सर्ववेदी ।
शरीरिणः स्मः स पुनर्विदेहोऽस्माकं समाराध्यतमः स तस्मात् ॥१८।

वयस्यगोष्ठीं विविधां विधातुं मिलेत् कथञ्चित् समयः सदापि ।
अल्पोऽवकाशोऽपि न शक्यलाभो देवस्य पूजाकरणाय हन्त!॥१९॥

आत्मोन्नतिं वास्तविकीं यदीयं समीहतेऽन्तःकरणं स मर्त्यः ।
उपासनार्थं परमेश्वरस्य कथञ्चिदाप्नोत्यवकाशमेव ॥ २० ॥

लोकापवादाद् भयशीलता च सुदक्षिणत्वं च कृतज्ञता च।
सर्वत्र निन्दापरिवर्जनं च सतां स्तवः प्रस्तुतयोग्यवाक्त्वम् ॥२१॥

कृतप्रतिज्ञापरिपालनं चासत्सद्व्ययत्यागविधानवत्त्वम्।
नालस्यवश्यं पुनराग्रहश्च सुयोग्यकार्येषु विवेकबुद्ध्या ॥ २२ ॥

अदैन्यमापद्यपि, नम्रता च सम्पत्प्रकर्षे, महतां च मार्गे।
समारुरुक्षाऽऽर्जवमार्दवे च सन्तोषवृत्तिः सुविचारता च ॥२३॥

लोकाऽविरुद्धाचरणानुवृत्तिः सर्वत्र चौचित्यविधायकत्वम्।
एवंप्रकारः स्वयमूहनीयः सद्भिः सदाचार उदारबुद्ध्या ॥ २४ ॥
चतुर्भिः कलापकम्।

स्वजीवनं कीदृशमुच्चनीति सम्पादयेद् योगपथारुरुक्षुः।
तदेतदेतेन विचारकाणां मनोभुवां स्पष्टमुपागतं स्यात् ॥ २५ ॥

बहुप्रकारं तप आमनन्ति युक्तं यथाशक्ति तपो विधातुम्।
देहस्य शुद्धिर्हृदयोज्ज्वलत्वं विधीयमानेऽत्र विवेकपूर्वम् ॥२६॥

किञ्चिद् व्यथायामपि सम्भवन्त्यामनादरस्तत्र न संविधेयः।
अभ्यासतोऽग्रे सुकरं तपःस्यात् कष्टाद् विना कर्म न हन्यतेऽपि ॥२७॥

न रोचते भोजनमन्वहं च कस्मै?, परं तेन क इष्यतेऽर्थः?।
अयं भवःस्याद् यदि सौख्यपूर्णस्तदा क्षमः स्याद् विषयैकसङ्गः॥२८॥

न वास्तवो भोजनमात्मधर्मो देहस्य सङ्गेन विधीयते तु।
तस्मादनाहारपदोपलब्ध्यै युक्तं तपोऽप्यभ्यसितुं सुधीनाम् ॥२९॥

न यत्र दुर्ध्यानमुपस्थितं स्याद् योगा न हानिं पुनराप्नुवन्ति।
क्षीणानि न स्युःपुनरिन्द्रियाणि कुर्यात् तपस्तत् सुविचारयुक्तम्।३०।

धनस्य हेतोरथवा नियोगे स्वस्वामिनः संसहते बुभुक्षाम्।
उद्देश आत्मोन्नतिसम्पदस्तु तपो यथाशक्त्यपि नैव चित्रम्! ॥३१।

वदन्ति सन्तः, प्रतिपद्यते च दावाग्निकल्पो भव एष भीमः ।
विचित्ररूपास्ति च कर्मसृष्टिस्तद् भोगकीटीभवितुं न युक्तम्॥३२॥

नानाविधस्वादुरसप्रपूर्णभोज्योपभोगे प्रविधीयमाने ।
प्रपद्यते यद्यपवर्गलक्ष्मीर्भवे तदा को बत पर्यटन् स्यात् ? ॥ ३३ ॥

अन्तःशरीरं प्रचरन्ति कर्मप्रत्यर्थिनो गुञ्जदनन्तशौर्याः ।
अन्नं प्रवेश्यं यदि पोषणीया नान्नं प्रवेश्यं यदि शोषणीयाः ॥३४॥

सम्पादितश्चेत् तपआदरेण कष्टस्य सम्यक् सहनस्वभावः ।
बहुप्रसङ्गे फलवान् तदा स्याद् रौद्रो न च स्याद् मरणक्षणोऽपि॥३५॥

भुक्तिः सकृद् वा रसवर्जिता वे-षड्नकुक्षिर्मितवस्तुभिर्वा ।
दिव्याशनानामपि साम्यतो वा प्रकीर्त्तिता सापि तपःस्वरूपा॥३६॥

गार्ध्यस्य मन्दीकरणं तपोऽस्ति प्राप्तं रहस्यं तपसोऽत्र सर्वम् ।
धन्या रमन्तेऽत्र विवेकदीपप्रोद्भासितात्मोन्नतिहेतुमार्गाः ॥३७॥

समग्रकर्मक्षयतोऽपवर्गो भवाभिनन्दा इमकं द्विषन्ति ।
अज्ञानसाम्राज्यमिहास्ति हेतुरहो ! महादारुण एष मोहः ॥३८॥

संसारभोगे सुखमद्वितीयं ये मन्वते लुप्तविवेकनेत्राः ।
निःश्रेयसं ते समधिक्षिपन्त आश्चर्यपात्रं न सतां भवन्ति ॥३९॥

सुस्वादुभुक्तिर्मधुरं च पानं मनोज्ञवस्त्राभरणादिधानम् ।
इतस्ततः पर्यटनं यथेष्टं वयस्यगोष्ठी सुमुखीमुखं च ॥ ४० ॥

इत्यादिकं शर्म बहुप्रकारकं संसारवासे प्रकटप्रतीतिकम् ।
मुक्तौ क्व नामेति विषस्य मोदकान् प्रसारयन्त्यज्ञगणे कुबुद्धयः॥४१॥
युग्मम् ।

संसारभोगेषु सुखं यदेव प्रतीतिमारोहति दुःखमेतत् ।
कर्मोद्भवत्वात् क्षणभङ्गुरत्वाद् दुःखान्वितत्वादमहत्त्वतश्च ॥४२॥

समस्तकर्मक्षयतोऽखिलार्थप्रकाशयुक्तं सुखमद्वितीयम् ।
यस्मिन् त्रिलोकीसुखमस्ति बिन्दुर्मुक्तौ क इच्छेन्नहि ?, को भवेद्
द्विट् ? ॥४३॥

एवं च मुक्तावनुकूलवृत्तिरवाद्युपायोऽभिहितेषु मुख्यः ।
यस्मिन् स्थितेऽन्येऽपि भवन्त्युपाया यत्रास्थिते व्यर्थ उपायराशिः
॥ ४४ ॥

इत्येव योगप्रथमाधिकारिप्रवर्त्तनं किञ्चिदिदं न्यगादि ।
यथावदस्मिन् पथि सञ्चरन्तः सम्यग्दृशो ग्रन्थिभिदा भवन्ति ।४५।

अर्धे परावर्त्तननामकालेऽवशिष्ट उत्कृष्टतया भवन्ति ।
सम्यग्दृशो मोक्षपदस्य लाभेऽप्ययं विलम्बोऽर्थत एव भूयान् ॥४६॥

विमलः परिणाम आत्मनः
किल सम्यक्त्वमुदीरितं बुधैः ।
अपवर्गपुरप्रवेशनं
न हि मुद्रामनवापुषामिमाम् ॥ ४७ ॥

तृतीय-प्रकरणम् ।

अष्टाङ्गयोगः ।

यत्राऽस्ति दुःखाननुविद्धमेवानन्तं सुखं शाश्वतमेष मोक्षः ।
समग्रकर्मक्षयलक्षणोऽसौ नह्यस्ति मुक्तिः सति कर्मलेशे ॥ १ ॥

स्वर्गापवर्गौ भवतो विभिन्नौ स्वर्गाद् यतः स्यात् पतनं, न मोक्षात्।
स्वर्गे सुखश्रीः पुनरिन्द्रियोत्था ज्ञेया परब्रह्ममयी तु मोक्षे ॥२॥

सकर्मकाकर्मकतो द्विधाऽऽत्माऽऽदिमस्तु संसारितया प्रसिद्धः ।
अकर्मको निर्वृत-मुक्त-सिद्ध-ब्रह्मादिशब्दैरभिधीयते च ॥ ३ ॥

मोक्षाऽऽप्तये योगविदः पुराणा योगस्य पन्थानमदीदृशन्नः ।
अष्टाङ्गभेदः स पुनः प्रसिद्धः प्रदर्श्यते किञ्चन तत्स्वरूपम् ॥४॥

यमनियमाऽऽसनप्राणायामाः प्रत्याहृतिश्च धारणया ।
सार्धं ध्यानसमाधी इत्यष्टाङ्गानि योगस्य ॥ ५ ॥

तत्राहिंसासत्याऽस्तेयब्रह्मापरिग्रहाश्च यमाः ।
शौचं तोषश्च तपः स्वाध्यायः प्रभुविचिन्तनं नियमाः ॥ ६ ॥

एकान्ततोऽभिन्नतया शरीर-शरीरिणौ सम्भवतो न युक्तौ ।
परो भवः कस्य हि जाघटीतु नाशे शरीरस्य शरीरिनाशात् ?॥७॥

नाप्येवमेकान्तपृथक्त्वमङ्गाङ्गिनोर्विचाराध्वनि सञ्चरिष्णु ।
एवं हि हिंसा नहि सम्भवित्री हते शरीरेऽपि शरीरभाजः ॥८॥

मेधाविनस्तत् प्रतियन्ति देहाद् विभिन्नमप्यङ्गभृतं कथञ्चित् ।
संयोगतोऽभिन्नमतोऽङ्गनाशे या स्याद् व्यथा तां प्रवदन्ति हिंसाम् ९॥

आकीटकादा च सुराधिराजात् सर्वत्र जीवेषु सुखासुखस्य ।
प्रियाप्रियत्वं परिचिन्त्य धीमान् न क्वापि हिंसाऽऽचरणं
विदध्यात् ॥ १० ॥

शरीरिणां वल्लभवल्लभं च प्राणाः स्वकीया इदमर्थमेव ।
साम्राज्यमप्याशु जनास्त्यजन्ति तत् किंविधं दानमलं वधाय? ॥११॥

अन्यस्य चेतःकमलस्य खेदहिमोदकेन ग्लपनेऽपि धीराः ।
हिंसावकाशं समुदीरयन्ति कथीकृतौ किं पुनरङ्गभाजाम् ? ॥ १२ ॥

प्रचण्डरोगाभिहतः पशुर्वा नरोऽथवा मारयितुं न युक्तः ।
केनोदितं प्राप्स्यति शं स मृत्वा नेतोऽपि च प्राप्स्यति दुःखमुग्रम्?१३।

व्यापादनं हिंसकवृत्तिभाजामपि क्षमं नेत्यवधारणीयम् ।
लोके श्व-मार्जार-मयूर-गृध्राद्योऽङ्गिनः के न भवन्ति हिंस्राः?॥१४॥

भयङ्करैर्वृश्चिक-दन्दशूकादिभिः परिक्लेशमधिश्रितोऽपि ।
न मारयेन्नापि च ताडयेत् तान् नह्यत्र कश्चित् फलसिद्धिलेशः॥१५॥

न पापहेतुः सुकृताय पापोच्छेदाय वा प्राणिवधः कदापि ।
किं जायते जीवितनाशहेतुर्हालाहलं जीवितसम्पदायै ? ॥१६॥

धर्मस्त्वहिंसाप्रभवः, कथं तद् हिंसात आविर्भविता कदापि ? ।
नह्यम्बुतः सम्प्रभवन्ति पाथोरुहाणि वन्हेर्जननं लभन्ते ॥ १७ ॥

इदं परं तेज इयं परा श्रीरिदं परं भाग्यमिदं महत्त्वम् ।
अशेषविश्वेश्वरनम्रमौलिनमस्कृतं सत्यमहाव्रतं यत् ॥ १८ ॥

मृषोद्यते यत् फलमाकलय्य फलस्य खल्वस्य मृषाऽऽगसश्च ।
अस्त्यन्तरं कीदृगवेक्षणीयं युक्ता हि कार्येषु तुलासमा धीः ॥१९॥

धनार्जनं न्यायपथेन सम्यगुद्योगतोऽशक्यतया क आह ? ।
आरम्भतो धीरतया तु सह्या आपद्यमानाः प्रतिकूलयोगाः ॥२०॥

शाम्यन्ति सर्वाण्यपि दूषणानि यथार्थवादे प्रविजृम्भमाणे ।
मृगेश्वरे क्रीडति वारणानां सम्भावनीयो हि कुतः प्रचारः?॥२१॥

प्रयातु लक्ष्मीः स्वजना अरातीभवन्त्वकीर्त्तिः प्रसरीसरीतु ।
अद्यैव वा मृत्युरुपस्थितोऽस्तु वदेदसत्यं न तथापि धीरः ॥२२॥

यतः परिक्लेशमुपैति जन्तुर्भाषेत सत्यामपि तां गिरं न ।
पृष्टोऽपि जल्पेन्न कदापि मर्मावित् कर्कशं वैरनिबन्धनं च ॥२३॥

पुनन्ति ते स्वीयपदारविन्दैः पृथ्वीतलं सुन्दरभागधेयाः ।
मनोवचोभूघनचेष्टितानि स्पृशन्ति नासत्यविषं यकेषाम् ॥२४॥

प्लुष्टोऽप्यहो ! प्रज्वलिताग्निना द्रुः सान्द्रीभवेद्, दुर्वचसा न लोकः।
वाक् सूनृता यं तनुते प्रमोदं न चन्दनं तं न च रत्नमाला ॥२५॥

विनश्वरी श्रीश्चपलाश्च भोगाः स्वार्थैकबद्धाः स्वजनाः समग्राः ।
अतो मृषावाद उपासनीयः किमर्थमेषा सुधियां मनीषा ॥ २६ ॥

अप्रत्ययं यद् वितनोति लोके दुर्वासनानां ददते निवासम् ।
दोषान् प्रसूते प्रबलान् क्रमेण तद् धर्मशीलो न वदत्यसत्यम् ॥२७॥

व्रतानि शेषाणि वदन्त्यहिंसासरोवरे पालिसमानि धीराः ।
सत्यस्य भङ्गे सति पालिभङ्गादनर्गलं तत् खलु विप्लवेत ॥२८॥

स्वमन्यदीयं हरताऽधमेन दत्तः स्वधर्मोपवने प्रदाहः ।
हृतं धनं स्वास्थ्यसुखं न सूते तस्मात् परिभ्रष्टमितस्ततोऽपि॥२९॥

दरिद्रता-दुर्भगता-शरीरच्छेदादिकं स्तेयफलं विलोक्य ।
तत्र प्रवृत्तिव्यसनं समुज्झेत्, युक्तो ग्रहीतुं न तृणोऽप्यपृष्ट्वा ॥३०॥

अद्यापि नो दृष्टमिदं श्रुतं वा यत् स्तेयमालम्बितवान् मनुष्यः ।
प्रभूतमानन्दमपेतशङ्कमभुक्त कोटीश्वरतां प्रपद्य ॥ ३१ ॥

यश्चौर्यपापद्रुमधिष्ठितोऽस्ति स्वास्थ्यं परं हारितवान् न, किन्तु।
धृतिं च धैर्यं च मतिं च सम्यग् जन्मान्तरं चापि स हीनभाग्यः॥३२॥

यो मार्यतेऽसौ क्षणमेक एव प्राप्नोति दुःखं द्रविणे हृते तु ।
सपुत्रपौत्रोऽप्युपयाति यावज्जीवं विचिन्त्येति जहातु चौर्यम् ॥३३॥

स्तेयप्रवृत्तिः खलु नीचकार्यमस्तेयवृत्तिः पुरुषार्थमार्गः ।
विशुद्धहस्तस्य च साधुवादः शास्यन्त्यनर्थाश्च परत्र-नाकम् ॥३४॥

यस्मिन् प्रदीपे शलभन्ति दोषा यस्मिन् सुधांशौ परितापशान्तिः।
यस्मिन् समुद्रे गुणरत्नभूतिस्तद् ब्रह्म को न स्पृहयेत् सचेताः?॥३५॥

यस्मिन् दिनेशे परितप्यमान उपद्रवध्वान्त उपैति नाशम् ।
इष्टार्थसम्पादनकल्पवृक्षेऽस्मिन् ब्रह्मचर्ये सुधियो यतेरन् ॥३६॥

सिंहासने चोपविशन् सुरेन्द्रः प्रवन्दते यान् शुचिभक्तिनम्रः ।
ते ब्रह्मचर्यव्रतबद्धचित्ता मनस्विना मर्त्यभुवां जयन्ति ॥ ३७ ॥

फलन्ति मन्त्रा वहते च कीर्त्तिरध्यासते सन्निधिमप्यमर्त्याः ।
यस्मिन् सति प्रस्फुरितप्रभावे तद् ब्रह्मचर्यं सुविचारलभ्यम् ॥३८॥

अस्थ्नां प्रभूतं बलमर्पयन्तं रक्तप्रवाहं प्रविकासयन्तम् ।
मुखे प्रतापारुणतां दधानं न कः सुधीर्ब्रह्मयमं सुरक्षेत् ! ॥३९॥

न तं शरत्पर्वहिमांशुरोचिः प्रह्लादमुत्पादयितुं क्षमेत ।
न तं रसं दिव्यफलानि चापि ह्लादं रसं ब्रह्म यमातनोति ॥४०॥

यत् प्राणभूतं मुनिधर्मलक्ष्म्या हेतुः परब्रह्मणि यच्च, यस्मात् ।
निर्याति मेधा तटिनीव शैलात् तत् पालयन् ब्रह्म न पूज्यते कैः ? ॥ ४१ ॥

इह प्रतिष्ठा च परत्र च स्वर्यस्माददो ब्रह्म विहाय, मार्गम् ।
आपातमात्रे रमणीयमन्ते किम्पाकवद् दारुणमाश्रयेन्न ॥ ४२ ॥

देहे तपस्येव न तापहेतुर्हेतुर्न वा भक्तिरिव श्रमस्य ।
स्वभावसिद्धो मनसः पवित्रीभावे स्थितो ब्रह्मयमश्चकास्ति ॥४३॥

परिक्षमन्ते गृहमेधिनस्तु न सर्वथाब्रह्ममहाव्रताय ।
तद् देशतो ब्रह्मणि ते यतेरन् स्वदारतुष्टाः परदारवर्जाः ॥४४॥

स्त्रियं स्वसारं जननीं सुतां वा स्वां कामदृष्ट्या समवेक्षमाणे ।
क्रोधोपतापप्रभवं विचिन्त्य परस्य नार्य्यां न दृशौ क्षिपेत ॥४५॥

नहि स्वदारा अपि सेवितव्या आसक्तितः, किं पुनरन्यनार्य्यैः।
नोत्सह्यते क्षेप्तुमितस्ततः स्वं ही ! यत्यते पातयितुं तु रेतः॥४६॥

शुक्रं शरीरस्य समस्ति राजा हते पुना राज्ञि पुरस्य हानिः ।
रक्षेत् ततः कामशरेभ्य एनं ब्रह्मोच्चसन्नाहधरं विधाय ॥ ४७ ॥

कः प्रत्ययस्तत्र परं पुमांसं या सेवते स्त्री चपलाऽपलज्जा ।
विषस्य पानं दहने च पातो वरं परस्त्री न तु सेवनीया ॥४८॥

सर्वस्वनाशः प्रबलं च वैरं बन्धो वपुष्पातनसंशयार्त्तिः ।
परत्र घोरस्थलसङ्गमश्चाऽन्यस्त्रीप्रसङ्गस्य फलान्यमूनि ॥ ४९ ॥

शिरीषपुष्पाधिकमार्दवाङ्गीं समुच्छलत्सुन्दरकान्तिपूराम् ।
समुल्लसत्पङ्कजगन्धि-पर्वशरत्सुधाधाममनोहराऽऽस्याम् ॥ ५० ॥

एवंविधां प्रौढकलाकलापामपि त्यजेद् योषितमन्यदीयाम् ।
साधारणस्त्रीमपि कालकूटवल्लीं परिज्ञाय विवेकशाली ॥ ५१ ॥
युग्मम् ।

मनःप्रवृत्तिर्वचसः प्रवृत्तिर्देहप्रवृत्तिश्च मिथो विभिन्नाः ।
यासां न साधारणयोषितस्ता निषेविताः स्युः सुखसम्पदायै ॥५२॥

वेश्यानुषक्तः पुरुषः किलाऽसत्सङ्गप्रसङ्गाभिरतो विवेकात् ।
तथाविधं भ्रश्यति येन देवान् न मन्यते नापि गुरूंश्च बन्धून् ॥५३॥

द्रव्येच्छया कुष्ठिनमप्यमर्त्योपमं परिस्निग्धदृशेक्षते या ।
स्नेहोज्झितां तां सृजतीमसत्यस्नेहं न गच्छेद् गणिकां कदापि ॥५४॥

रूपं यदेव प्रविलोक्य माद्यन्नाभ्यन्तरं तस्य यदि स्वरूपम् ।
विचिन्तयेत् तत्त्वदृशा, न तर्हि भवेत् स्मरान्दोलितचित्तवृत्तिः ॥५५॥

पराङ्गनासङ्गमपातकाग्नौ सर्वे गुणा आहुतिमाप्नुवन्ति ।
अतः परं किञ्चन नास्ति मौर्ख्यमतः परं नाप्यधमं चरित्रम् ॥५६॥

पुंसः प्रतीदं प्रतिपाद्यते स्म यद् ब्रह्मचर्यं वनिताजनोऽपि ।
तात्पर्यतस्तत् क्षमते ग्रहीतुं निजस्थितिं चेतसि लक्षयित्वा ॥५७॥

परिग्रहाद् मूर्च्छति, मूर्च्छनाच्च कर्मप्रबन्धा इति सम्प्रवीक्ष्य ।
परिग्रहं सर्वमपि त्यजन्ति द्रव्यादिरूपं मुनयोऽपसङ्गाः ॥५८॥

गृहस्थभावो मुनिता च भिन्ने परिग्रही तन्न मुनिर्गृहीव ।
परिग्रहाऽऽसक्तमुनेर्मुनित्वे भवेन्न कस्माद् गृहिणां मुनित्वम् ? ॥५९॥

निन्द्यो गृही स्यादपरिग्रहत्वे निन्द्यो मुनिः स्यात् सपरिग्रहत्वे ।
द्रव्योपभोगे मदनप्रसक्तेरपि प्रचारस्य न दुर्वचत्वम् ॥ ६० ॥

द्रव्यग्रहे लाभदृशापि मूलक्षतिं विनाऽन्यन्न वदन्ति सन्तः ।
संसारदुर्वातनिरोधहेतुः सुनिश्चितं साध्वपरिग्रहत्वम् ॥ ६१ ॥

गृहस्थवर्गस्त्वपरिग्रहत्वमध्यासितुं न प्रभविष्णुरस्ति ।
अतः स कुर्वीत परिग्रहस्य प्रमाणमाशाप्रसरावरोधि ॥ ६२ ॥

परिग्रहस्याऽस्खलितप्रचारे तृष्णा प्रचारं लभते नितान्तम् ।
ततो जनः पोत इवाम्बुराशौ भवे निमज्जेदिति चिन्तनीयम् ॥६३॥

परिग्रहस्यातिवशीभवन्तं मुष्णन्ति चौरा विषयाभिधानाः ।
दहत्यनङ्गो दहनः कषायव्याधा निरुन्धन्ति पुनः समन्तात् ॥६४॥

पापस्य वल्लीमसुखस्य खानिं दोषावलीमातरमाहुराशाम् ।
आशोर्मयस्तत्र चरन्ति वेगाद् न यत्र भासः शशिनो रवेश्च ॥६५॥

आक्रान्तविश्वत्रितयोऽपि लोभपयोनिधिस्तैः प्रसरन् निरुद्धः ।
यमोंऽशतोऽप्येष समाश्रितो यैरेवंविधाः स्युर्गृहिणोऽपि धन्याः ६६॥

आरम्भभारा भववृक्षमूलं परिग्रहः कारणमस्त्यमीषाम् ।
तस्मादवश्यं नियतप्रमाणं परिग्रहं संविदधीत गेही ॥ ६७ ॥

एतानहिंसादियमान् स्वशक्तेरर्हन्ति सम्पालयितुं समग्राः ।
धर्मोऽस्त्ययं सार्वजनीन एव स्वाभाविकी जीवननीतिरेषा ॥६८॥

उक्ता अहिंसादियमा अमी दिक्कालाद्यवच्छिन्नतया विमुक्ताः ।
महाव्रतं सन्ति च सार्वभौमा वितर्कबाधे प्रतिपक्षचिन्ता ॥६९॥

वितर्कबाधे प्रतिपक्षचिन्तनाद् योगस्य सौकर्यमवेक्ष्य योगिनः ।
यमेषु योगस्य बभाषिरेऽङ्गतां विघ्नापनेता प्रथमं हि युज्यते ॥७०॥

हिंसादयः सन्ति वितर्कसञ्ज्ञकाः प्रत्येकमेते खलु सप्तविंशतिः ।
कृतानुमोदास्पदकारिता हि ते क्रोधाच्च लोभाच्च तथैव मोहतः॥७१॥

नवेति भेदा मृदु-मध्य-तीव्रैर्भेदैस्त्रिभिः सन्ति यथोक्तसंख्याः ।
प्रत्येकमेते मृदुमध्यतीव्रास्त्रिधा पुनः स्युर्मृदुमध्यतीव्रैः ॥ ७२ ॥
युग्मम् ।

अनन्तमज्ञानमनन्तदुःखं फले अमीषां नितरां विभाव्ये ।
अतः प्रकर्षं समुपेयुषां यत् फलं यमानामभिधीयते तत् ॥ ७३ ॥

दयाव्रतस्थैर्यवतः पुरस्ताद् निसर्गवैरा अपि देहभाजः ।
मिथः प्रशाम्यन्ति तदेवमाद्ये व्रते फलं योगबुधा अवोचन् ॥७४॥

सत्यव्रते प्राप्तवति प्रतिष्ठां फलं प्रसिध्यत्यकृतेऽपि यत्ने ।
स्यादस्य वाचा च फलं परस्याऽनुद्यच्छतोऽपीति फलं द्वितीये॥७५॥

अस्तेयनामव्रतनिश्चलत्वे भवन्ति रत्नानि न दुर्लभानि ।
प्रतिष्ठिते ब्रह्मणि वीर्यलाभोऽपरिग्रहे जन्मकथन्त्वबोधः ॥७६॥

योगदृष्टिः ।

अष्टौ च योगस्य वदन्ति दृष्टीरष्टाभिरङ्गैः सह ताः क्रमेण ।
सुश्रद्धया सङ्गत एव बोधो दृष्टिर्विभाषे प्रथमाऽत्र मित्रा ॥ ७७ ॥

मन्दं च मित्रादृशि दर्शनं स्यात् तृणानलोद्द्योत इहोपमानम् ।
न देवकार्यादिषु खेदवृत्ती रोषप्रसङ्गोऽपि च नापरत्र ॥ ७८ ॥

श्रीवीतरागे कुशलं मनोऽस्मै नमश्च पञ्चाङ्गतया प्रणामः ।
संशुद्धमेतत् किल योगबीजं गृह्णाति दृष्टाविह वर्त्तमानः ॥७९॥

न केवलं तत् खलु वीतरागे मुनिप्रवेकेष्वपि शुद्धरूपम् ।
विशुद्धाशयतश्च सेवाऽऽहारप्रदानादिवप्रकारैः ॥ ८० ॥

उद्विग्नता चात्र भवाम्बुराशेः सामान्यतोऽभिग्रहपालनं च ।
श्रीधर्मशास्त्रेषु समादरश्च श्रद्धा च बीजश्रवणे प्रभूता ॥ ८१ ॥

एवं च दृष्टाविह वर्त्तमानः कृपापरो दुःखिषु, निर्गुणेषु ।
अद्वेषकश्चोचितसम्प्रवृत्तिर्योगप्रवीणैः कथयाम्बभूवे ॥ ८२ ॥

दुर्बोधघर्मे विपुलोऽम्बुवाहो दुर्वर्त्तनद्रौ निशितः कुठारः ।
सत्सङ्गतिर्या मुनिभिर्न्यगादि तत्प्राप्तिरत्र प्रगतेर्निदानम् ॥ ८३ ॥

अन्त्ये परावर्त्त इमां च दृष्टिं कल्याणरूपां लभते सुभागः ।
हेतुः परो भावमलाल्पताऽत्र घने मले सत्सु न सत्त्वबुद्धिः ॥८४॥

यथाप्रवृत्तौ करणेऽन्त्य ईदृग् आसत्तिमद्ग्रन्थिभिदः स्वरूपम् ।
अपूर्वतां तेन यथाप्रवृत्तेरासन्नभावेन बुधा अवोचन् ॥ ८५ ॥

चतुर्दशोक्तानि जिनागमे गुण–स्थानानि, तत्र प्रथमं निगद्यते ।
समागतस्य प्रथमामिमां दृशं शास्त्रे तु सामान्यत एव वर्णितम् ॥८६॥

यमप्रधाना प्रथमा दृगुक्ता तारा द्वितीया नियमप्रधाना ।
शौचस्य सद्भावनया च तत्र घृणा स्वदेहेऽन्यशरीरसङ्गः ॥८७॥

सुसत्त्वसिद्धिः सुमनस्कभाव एकाग्रभावो जय इन्द्रियाणाम् ।
आत्मस्वरूपेक्षणयोग्यता च फलान्यमूनि प्रतिपादितानि ॥८८॥
युग्मम् ।

सन्तोषतोऽनुत्तमसौख्यलाभः स्वाध्यायतो दर्शनमिष्टदेवे ।
*तपेन कायेन्द्रिययोश्च सिद्धिः प्रोक्ता समाधिः प्रणिधानतश्च ॥८९॥

अस्यां च तारादृशि गोमयाग्नि–कणोपमं दर्शनमूचिवांसः ।
नोद्विग्नभावोऽत्र हितप्रवृत्तौ तत्त्वावबोधस्य पुनः समीहा ॥९०॥

---

* अकारान्तोऽप्यस्ति ।

प्रीतिस्त्वविच्छिन्नतयाऽत्र योग-कथासु भक्तिर्महती च सत्सु ।
भयं न तीव्रं भवतस्तथाऽनाभोगेऽपि नात्यर्थमयोग्यकर्म ॥ ९१ ॥

त्रासः स्वकीये विकले च कृत्येऽधिकेऽधिकस्थे च विबोद्धुमिच्छा ।
दुःखप्रहाणाय सतां प्रयत्नं नानाविधं वीक्ष्य कथन्त्वबुद्धिः ॥९२॥

नास्माकमुच्चैःप्रतिभाप्रकाशो ग्रन्थाः पुनः सन्ति सुविस्तरेण ।
शिष्टाः प्रमाणं तदिहेत्यमुष्यां दृष्टौ सदा तिष्ठति मन्यमानः ॥९३॥

यत्राऽऽसनं नाम सुख-स्थिरं स्याद् दृष्टिर्बला सा विदिता तृतीया ।
दृढं च काष्ठाग्निकणप्रकाशसमं भवेद् दर्शनमत्र दृष्टौ ॥ ९४ ॥

महांश्च तत्त्वश्रवणाभिलाषः क्षेपो न योगस्य पथि प्रयाणे ।
असाधुतृष्णा-त्वरयोरभावात् स्थिरं सुखं चाऽऽसनमाविरस्ति॥९५॥

अतोऽन्तरायाः शममाप्नुवन्ति द्वन्द्वाभिघातो न च सम्भविष्णुः ।
अपायदूरीभवनेन कृत्यं भवेत् समस्तं प्रणिधानपूर्वम् ॥ ९६ ॥

यूनः सकान्तस्य विदग्धबुद्धेर्यो दिव्यगेयश्रवणेऽभिलाषः ।
तत्कोटिमारोहति तत्त्वविद्यासुधासमास्वाद इहाभिलाषः ॥९७॥

असत्यमुष्मिन् श्रुतमप्यपार्थमिवोषरायां भुवि बीजवापः ।
सति त्वमुष्मिन्नसति श्रुतेऽपि निःसंशयं कर्मपरिक्षयः स्यात् ॥९८॥

तुर्याऽन्विता प्राणयमेन योगोत्थानेन मुक्ता दृगवादि दीप्रा ।
अस्यां च तत्त्वश्रवणप्रवृत्तिर्न सूक्ष्मबोधः पुनरत्र भाति ॥ ९९ ॥

यः श्वास-प्रश्वासगतिप्ररोधः स योगिभिः प्राणयमो बभाषे ।
स रेचकः पूरक-कुम्भकौ च श्वासो बहिर्वृत्तिरिहाऽऽदिमः स्यात्
॥ १०० ॥

प्रपूरणं यत् पुनरस्य पूरकः स्थिरत्वसम्पादनमेव कुम्भकः ।
नैकस्वभावाः खलु योगसाधका गच्छन्ति केचित् तत ईदृशा पथा
॥ १०१ ॥ (युग्मम्)

स्याद् भावतः प्राणयमस्तु बाह्यभावस्य रेकाद् अथ पूरणेन ।
अन्तःस्वभावस्य, यथार्थतत्त्वधीकुम्भनाद्, उत्तमसेतदङ्गम् ॥१०२॥

स्त्रीतोऽपि मित्रादपि पुत्रतोऽपि धर्मः प्रियः स्यादिह प्राणतोपि।
धर्माय प्राणानपि* विक्षिपेत प्राणान्तकष्टेऽपि न तु त्यजेत् तम्॥१०३॥

एवं भवक्षारपयोनिरासात् तत्वश्रुतिस्वादुजलेन पुण्यम् ।
बीजं प्ररोहप्रवणं करोति सम्यङ्मतिः सद्गुरुभूरिभक्तिः ॥१०४॥

मिथ्यात्वमस्मिंश्च दृशां चतुष्केऽवतिष्ठते ग्रन्थ्यविदारणेन ।
ग्रन्थेर्विभेदो भवति स्थिरायां तद् दक्चतुष्केऽत्र न सूक्ष्मबोधः॥१०५॥

अवेद्यसंवेद्यपदाभिधेयं मिथ्यात्वदोषाशयमूचिवांसः ।
तस्य प्रभावेण कृतावकाशा कृत्येष्वकृत्येष्वविवेकबुद्धिः ॥१०६॥

अवेक्षमाणा अपि जन्म-मृत्यु-जराऽऽमयोपद्रवदुःखपूर्णम् ।
संसारमल्पेतरमोहदोषात् समुद्विजन्ते नहि देहभाजः ॥ १०७ ॥

अवेद्यसंवेद्यपदं चतुष्के दृशाममूषामपि वर्त्तमानम् ।
सत्सङ्गतस्तस्य विनिर्जयेन स्वतोऽपयात्येव कुतर्कराहुः ॥१०८॥

शमाम्बुवाहे प्रतिकूलवातं सद्बोधपद्मे च हिमोपपातम् ।
श्रद्धानशल्यं स्मयकारणं च प्रचक्षते योगविदः कुतर्कम् ॥१०९॥

वादस्य मार्गाः प्रतिवादमार्गा नानाविधाः सन्ति सतां सभासु ।
तत्त्वान्तमाप्नोति न खल्वमीभिर्दृष्टान्त आस्ते तिलपीलकोऽत्र॥११०॥

एकेऽभियुक्ता असुकं पदार्थं यथाऽनुमानैः परिकल्पयन्ति ।
अन्येऽभिरूपा असुमेव भावमन्यस्वरूपं प्रतिपादयन्ति ॥१११॥

अतीन्द्रियार्था यदि हेतुवादैर्विनिश्चयाध्वानमधिश्रयेयुः ।
एतावतः कालत एव तेषु सुनिश्चयः प्राज्ञवरैः कृतः स्यात् ॥११२॥

तस्मात् कुतर्कग्रह उज्झितव्यो नानेन कोऽप्यस्ति फलोपलम्भः ।
मध्यस्थभावे च कृतावकाशो सम्यग्दृशां सम्भविता विकासः॥११३॥

सम्यग्दृशः सन्ति चतस्र एताः स्थिरा च कान्ता च प्रभा परा च ।
प्रत्याहृतिस्तत्र भवेत् स्थिरायां स्याद् दर्शनं भ्रान्तिविवर्जितं च
॥ ११४ ॥

* छन्दोभङ्गो नात्र सम्भाव्यः । अन्यत्रापीदृक्षु स्थलेषु ।

प्रत्याहृतेर्ग्रन्थिविभेदनेन स्फुरद्विवेकोज्ज्वलमानसानाम् ।
संसारचेष्टा प्रतिभाति बालधूलीगृहक्रीडनसन्निभैव ॥ ११५ ॥

तत्त्वं परं ज्योतिरिह ज्ञरूपं वैकल्पिकः सर्व उपप्लवोऽन्यः ।
एवं च भोगो भवभोगिभोगाऽऽभोगस्वरूपः प्रतिभासतेऽत्र ॥११६॥

रत्नप्रभाया उपमोदिताऽत्र सूक्ष्मावबोधस्य समन्वयोऽपि ।
प्रत्याहृतिः सा पुनराचचक्षे समाहृतिर्याऽर्थत इन्द्रियाणाम् ॥११७॥

अवेद्यसंवेद्यपदाद् विरुद्धं स्याद् वेद्यसंवेद्यपदं स्थिरायाम् ।
एतत् पुनर्ग्रन्थिविदारणोत्थं रुचिप्रकारं मुनयो वदन्ति ॥११८॥

ततश्च कान्तादृशि संप्रवेशस्ताराप्रभाभं ध्रुवदर्शनं च ।
चित्तस्य देशे स्थिरबन्धनं यत् तां धारणामत्र वदन्ति सन्तः॥११९॥

स्थिरस्वभावादिह नान्यमुच्च मीमांसनाया अपि संविकासः ।
सम्यक्स्थितः स्यादथ धारणायां लोकप्रियो धर्मसुलीनचेताः ॥१२०॥

मायाजलं तत्त्वत ईक्षमाणोऽनुद्विग्न एत्याशु यथाऽस्य मध्यात् ।
भोगान् स्वरूपेण तथैव मायाऽम्बुवद् विदन् भुङ्क्त उपैति मोक्षम्
॥१२१॥

न धर्मशक्तिं प्रबलाममुष्यां भोगस्य शक्तिः क्षमते विहन्तुम् ।
दीपापहो गन्धवहो ज्वलन्तं दवानलं नेतुमलं शमं किम् ? ॥१२२॥

मीमांसना दीपिकया समाना मोहान्धकारक्षपणेऽत्र भाति ।
तत्त्वप्रकाशप्रसरेण तेनाऽसमंजसस्याऽपि कुतः प्रचारः ? ॥१२३॥

दृष्टिः प्रभाऽर्कद्युतितुल्यबोधा ध्यानैकसारा रहिता रुजा च ।
प्रवर्त्तते ध्यानसमुद्भवं शं शमप्रधानं स्ववशं गरिष्ठम् ॥ १२४ ॥

सर्वं भवेद् अन्यवशं हि दुःखं सर्वं भवेद् आत्मवशं च सौख्यम् ।
सुखासुखं वस्तुत एतदुक्तं गुणोऽत्र तत्त्वप्रतिपत्तिरूपः ॥ १२५ ॥

या धारणाया विषये च प्रत्ययैकतानताऽन्तःकरणस्य तन्मतम् ।
ध्यानं, समाधिः पुनरेतदेव हि स्वरूपमात्रप्रतिभासनं मतः १२६॥

असङ्गवृत्त्याख्यकसत्प्रवृत्तिपदं प्रभायां लभते मुनीन्द्रः ।
प्रशान्तवाहित्वमपीदमेवेदमेव नामान्तरतोऽन्य आहुः ॥ १२७ ॥

दृष्टिः परा नाम समाधिनिष्ठाऽष्टमी तदासङ्गविवर्जिता च ।
सात्मीकृताऽस्यां भवति प्रवृत्तिर्बोधः पुनश्चन्द्रिकया समानः ॥१२८॥

अस्यां निराचारपदो मुनीश्वरः श्रीधर्मसंन्यासबलेन केवलम् ।
लब्ध्वोत्तमं योगमयोगमन्ततः प्राप्यापवर्गं लभतेऽस्तकर्मकः ॥१२९॥

तृणगोमयकाष्ठहव्यभुक्-
कणदीपप्रभयोपमीयते ।
अथ रत्न-भ-भानु-चन्द्रमः-
प्रभया बोध इह क्रमात् पुनः ॥ १३० ॥

खेदादिदोषा इह निर्गतास्तथाऽ
द्वेषादिका अष्ट गुणाः श्रिताः क्रमात् ।
इत्येवमङ्गाष्टकमष्टकं दृशां
संक्षेपतोऽदर्श्यत योगिसम्मतम् ॥१३१॥

चतुर्थ-प्रकरणम् ।

कषायजयः ।

आत्मस्वरूपं प्रथमं प्रविद्युर्योगश्रियां प्रोत्सहमानचित्ताः ।
स एव योगस्य यदस्ति भूमिराकाशचित्रोपममन्यथा स्यात् ॥१॥

आत्मक्षेत्रे योगतः कृष्यमाणे सम्यग्रूपैः सन्ततं प्रौढयत्नैः ।
सम्पद्यन्तेऽनन्तविज्ञानवीर्याऽऽनन्दा नास्ते संशयस्याऽत्र लेशः ॥२॥

इदं पदार्थद्वितये समस्तमन्तर्भवन्न व्यतिरिच्यतेऽतः ।
जडस्तथा चेतन इत्यमू द्वौ, जडेन चैतन्यमुपावृतं नः ॥ ३ ॥

प्रसिद्धमेतच्च जडस्य योगात् क्लेशान् विचित्रान् सहते सदाऽऽत्मा ।
विवेकबोधे प्रतिभाति देहाद् दुःखातिथिः स्यात् कुत एष आत्मा ? ॥ ४ ॥

संक्लेशानामेकमेवास्ति मूलमात्माज्ञानं तच्च धीरा वदन्ति ।
आत्माज्ञानोद्भूतदुःखं प्रणश्येद् आत्मज्ञानाद्, अन्यथा नो तपोभिः ॥ ५ ॥

संसार आत्मैव जितः कषायेन्द्रियैः स एवेतरथा च मोक्षः ।
क्रोधादयस्तत्र कषायसञ्ज्ञाश्चत्वार उक्ता भववृक्षमेघाः ॥ ६ ॥

यो वैरहेतुः परितापकारणं शमार्गला दुर्गतिवर्त्तनी पुनः ।
उत्पद्यमानः प्रथमं स्वमाश्रयं दहेद् दहेद् वन्हिरिवापरं न वा ॥७॥

क्रोधस्य तस्य प्रशमे क्षमा क्षमा क्षमाऽऽत्मसाम्राज्यपरिस्पृहावताम् ।
या संयमाऽऽरामविशालसारणिः क्लिष्टाघभूमीधरभेदनाशनिः ॥८॥
युग्मम् ।

क्रोधः प्रसिद्धो मृदुमध्यतीव्राद्यनेकभेदैः सकलानुभूतौ ।
यादृक्स्वरूपः स उदेति तादृग्रसानुविद्धं वितनोति कर्म ॥९॥

योगस्य पन्थाः परमस्तितिक्षा सा क्रोधदावानलमेघवृष्टिः ।
यस्तामृतेऽभीप्सति योगलक्ष्मीं हलाहलाद् वाञ्छति जीवितं सः ॥१०

निशम्य दुर्भाषितमन्यदीयं नातन्वते रोषमुदारचित्ताः ।
सम्पादनीयः सहनस्वभावः शाठ्यं शठाग्रे नहि कर्त्तुमर्हम् ॥११॥

क्रोधं च कस्माद् विदधीत योगी? दुर्भाषितैः स्यान्न हि कोपि रोगः।
न वा यशःश्रीर्लभते विलोपं द्रव्यस्य हानेरपि नास्ति वार्त्ता ॥१२॥

रोषेण वैरं लभतेऽवकाशं वैरात् पुनः सत्त्वगुणप्रहाणिः ।
एवं स्खलेत् सञ्चरमाण आत्मोन्नत्यध्वना रोषसमाश्रयेण ॥१३॥

रुष्यज्जनं प्रेरयतेऽस्मदीयं प्राचीनकर्मेत्यथ चिन्तनीयम् ।
पराश्रये रुष्यति वा प्रकोपः प्रयोजके कर्मणि वा विधेयः? ॥१४॥

कृतापराधे यदि नाम कोपो न कर्म किं तर्हि कृतापराधम् ? ।
एतत् प्रभासेत विचार्यमाणं सर्वेऽपराधाः खलु कर्मराजः ॥१५॥

त्रैलोक्यचूडामणयोऽपि देवाधिदेवतास्ताडन-तर्जनादि ।
वितेनुषः क्षान्तिभरैरपश्यन् क्षमा तदेवं न हि किं क्षमा नः?॥१६॥

प्रकम्पमानौष्ठक-रक्तनेत्र-प्रस्वेदसंक्लिन्नमुखारविन्दम् ।
क्रुध्यन्तमालोक्य विचारशीलैर्ज्वरीव मान्यःकरुणाऽऽस्पदं सः॥१७॥

ज्वरातुरे कुर्वति दुर्वचांसि यथा न कोपः क्रियते दयातः ।
तथा दयादृष्टित एव दृश्यः क्रोधज्वराद् दुर्वचनानि कुर्वन् ॥१८॥

वनस्पतित्वे च पिपीलिकात्वे समागतोऽनेकश एष आत्मा ।
तदाऽभिमानो गलितोऽस्य कुत्र न सह्यते सम्प्रति दुर्वचो यत्?॥१९॥

आक्रोशशान्तिर्मधुरैर्वचोभिराक्रोशतोऽसौ पुनरेति वृद्धिम् ।
प्रदीपनस्य प्रशमाय वारि क्षिपन्ति नोत्तेजकमिन्धनादि ॥२०॥

दूरीकृताः सम्पद उज्झिता स्त्री नीतः समग्रः स्वजनोऽप्युपेक्षाम् ।
अथ प्रकोपाचरणं किमर्थं तथाप्यसौ चेद् हतभागतेयम् ॥ २१ ॥

कोऽस्त्यस्मदीयो भुवनत्रयेऽपि कर्त्तुं क्रुधं यत्र किलाधिकारः ? ।
संसर्ग एषोऽस्ति च कर्मकल्प्यो न्याय्यं प्रकोपाचरणं न तस्मात् ॥२२॥

स्थातव्यमत्रास्ति कियद्दिनं यत् कोपाग्निना प्रज्वलनं क्षमं स्यात्?।
यद्यैहिकार्थे क्षम एव कोपः पारत्रिकार्थे प्रशमो न तर्हि ? ॥२३॥

यमान् कुरुध्वं नियमान् कुरुध्वं क्रियां कुरुध्वं च तपः कुरुध्वम्।
न चेत् समस्ति प्रशमावगाहः काऽऽशा तदेभ्यः फलमुच्चमाप्तुम्?
॥ २४ ॥

मनश्च वाचा च वपुश्च यस्याऽवगाहते क्षान्तिसुधासमुद्रे।
धन्यः कृतार्थः सुकृती महात्मा कलावपि प्रेक्ष्यमुखाम्बुजोऽसौ ॥२५॥

क्रोधान्धलीभूय यदेव कार्यं करोति सद्यो विपरीतरूपम्।
तदेव कोपोपरमे त्रपायै दुःखाय च स्याद्, धिगहो ! अविद्या ॥२६॥

आक्रोशने वा परिताडने वा योगप्रवाहे स्थितवानृषिस्तु।
ध्यायेद्-'न मे किञ्चन नाशमेति सच्चित्स्वरूपं मम निश्चलं यत्'
॥२७॥

उच्चस्वरूपः प्रकटो यदा स्याद् देहाऽऽत्मनोर्भिन्नतया प्रकाशः।
छिन्ने च भिन्ने च तदा शरीरे नाऽत्मा भवेत् स्वात्मरतो विकारी
॥२८॥

क्रिया सुसाधा च तपः सुसाधं ज्ञानं सुसाधं नियमाः सुसाधाः।
दुःसाध एकः स च कोपरोधः स साधितः साधितमप्यशेषम् ॥२९॥

रोषो विधातुं न हि यत्र तत्र युक्तो गृहस्थैरपि वेदितव्यम्।
सर्वत्र सर्वेष्वपि घोषयामः- क्रोधस्य मन्दीकरणन्तु युक्तम्॥ ३० ॥

अनेकशास्त्राणि विलोकितानि रहस्यमध्यात्मगिरां च लब्धम्।
तथापि लब्धा यदि नो तितिक्षा ज्ञेयस्तदाऽसौ हृदयेन मूर्खः ॥३१॥

यावन्न मानादिकदूषणानां रुद्धः प्रचारो नहिं तावदेषः।
शक्यः समापादयितुं निरोधं मानादिदोषा अपि तेन हेयाः ॥३२॥

विवेकनेत्रं हरताऽस्मदीयं मानेन तीव्रो विहितोऽपराधः।
न त्यज्यते तच्छ्रयणं तथापि सम्मूढता कीदृगतः परं स्यात् ? ॥३३॥

सभ्यत्वदुग्धं यदि रक्षणीयं तद् दर्पसर्पेण न सङ्गतं स्यात् ।
विद्यासुधादीधितिशीतभासो मानाभ्रविक्षेपणतः स्फुरन्ति ॥३४॥

मानः पदार्थे क्व विधातुमर्ह इत्येव सम्यग् हृदि चिन्तनीयम् ।
प्रत्यक्षमालोक्यत एव विश्वे कुतोऽपि कोऽप्यस्त्यधिको हि मर्त्यः ३५॥

अनन्यसाधारणबुद्धिमत्त्वमनन्यसाधारणशक्तिमत्त्वम् ।
अनन्यसाधारणभाषकत्वं क्वाऽस्मासु कुर्याम यतोऽभिमानम्! ॥३६॥

न श्रीः प्रसन्ना प्रविकासिदृग्भ्यां न भारती दत्तवती वरं च ।
अलौकिकं कर्म कृतं न किञ्चित् तथाप्यहो ! दर्पसमुद्धतत्वम् ! ॥३७॥

न धीरिमा वा न गभीरिमा वा न सासहित्वं न परोपकारः ।
महान् गुणो वा नहि कोऽपि तादृक् तथापि गर्वः किमतः प्रहास्यम् ?
॥ ३८ ॥

रूपेण शक्रप्रतिमोऽपि मर्त्यः कालान्तरे म्लानिमुपैति रोगैः ।
राज्ञोऽपि रङ्कीभवनं स्फुटं च कस्तर्हि मानाचरणे मतोऽर्थः? ॥३९॥

सामान्यवर्गः खलु लक्षनाथमसौ च कोटीशमसौ च भूपम् ।
असौ च सम्राजमसौ च देवमसौ च देवेन्द्रमसौ मुनीन्द्रम् ॥ ४० ॥

असौ च सर्वज्ञतया विभान्तमसौ च विश्वत्रितयेशितारम् ।
सम्यक्तया यद्यवलोकयेत कुतस्तदोन्मादकताऽवकाशः ? ॥ ४१ ॥
युग्मम् ।

यत्पादपङ्के मधुपन्ति सर्वे सुरेश्वरास्ते जगदीशितारः ।
दर्पोष्मलेशादपि सम्प्रमुक्ताः किं नः क्षमस्तर्ह्यभिमानलेशः? ॥४२॥

निमील्य नेत्रे हृदयं निवेश्य प्रशान्ततायां परिचिन्तनायाम् ।
स्वयं त्रपाया* अभिमानचेष्टा संजायतेऽत्रानुभवः प्रमाणम् ॥४३॥

महाव्रताम्भोरुहरात्रिणा च तपःसुधादीधितिराहुणा च ।
न यो जनः सञ्चरतेऽभिमानाध्वना स धन्यः सुरगेयकीर्त्तिः ॥४४॥

* चतुर्थी ।

भवत्स्वरूपं परिचिन्त्य तस्माद् निवार्यतां मानभुजङ्गमोऽयम् ।
नैवाऽमृतं तत्सहचारितायां भवेत् परं मोहविषोपभोगः ॥ ४५ ॥

माया मता योगलताहुताशो ज्ञानार्गला दुर्भगतानिदानम् ।
आत्मार्थिना सद्व्यवहारलक्ष्मीस्पृहावता वा परिहीयतां सा ॥४६॥

पदे पदे दम्भमुपासते ये लक्षाधिपास्ते भुवि वीक्षिताः किम् ? ।
न न्यायतः किं व्यवहारवृत्तिर्यत् स्वाय दम्भाचरणं क्षमं स्यात् ?
॥ ४७ ॥

न्यायप्रतिष्ठः पुरुषो भवेच्चेद् व्यापारतोऽसौ नियमात् सुखी स्यात् ।
न्यायस्य मार्गेण वरं बुभुक्षा नाऽन्यायमार्गेण परं प्रभुत्वम् ॥४८॥

कौशल्यमाबिभ्रति सात्त्विकं ये न्यायप्रतिष्ठा विकसद्विवेकाः ।
पापास्पदं ते प्रविदन्ति मायां विनैव तां स्वार्थमुपार्जयन्ति ॥४९॥

अनेकशः पश्यति सर्वलोकः कृतेऽपि दम्भाचरणे प्रकृष्टे ।
अर्थो न सिद्धिं लभते, तदेवमर्थस्य सिद्धौ स कुतो निमित्तम् ?॥५०॥

इयं च माया जननी तदीया यः सर्वदोषेषु पुरःसरोऽस्ति ।
आख्या मृषावाद इतीदमीया न सज्जनः सेवति तेन मायाम् ॥५१॥

अप्रत्ययानां प्रसवस्य भूमीमपारसन्तापसमर्पयित्रीम् ।
शल्यं महच्चेतसि कः सुमेधा मायामुपासीत विवर्जनीयाम् ? ॥५२॥

कुर्वन्ति ये दुःखि मनः परस्य प्रतारणातो बहुभिः प्रकारैः ।
पुष्णन्ति हिंसाविषवल्लरीं ते दूरे दयाऽऽरामत ईदृशः स्युः ॥५३॥

पिपीलिकादीन् लघुदेहभाजो रक्षन्ति यत्नैर्मनुजान् पुनर्ये ।
प्रपातयन्त्यापदि वञ्चयित्वा दयालवस्ते न हि, किन्तु पापाः॥५४॥

अस्त्येकतो वञ्चनतत्परत्वं देवस्तुतौ गर्जनमन्यतश्च ।
एतादृशा नो किमपि त्रपन्ते कृतेन सम्यक् तिलकेन भाले॥५५॥

प्रवञ्चकत्वे सति सन्निपातेऽनुष्ठानदुग्धं विकृतिं प्रयाति ।
उत्खन्य मायां विशदीकृतायां मनोभुवां बीजकमङ्कुराय ॥५६॥

संसारसिन्धोः परिलङ्घनार्थमध्यात्मपोते बहुभागलभ्ये ।
चेद् छिद्रलेशोऽपि हि दम्भनामा न तर्हि तत्पारगतिस्ततः स्यात् ५७

वने हुताशः कलहः सुहृत्त्वे रोगः शरीरे कमले हिमं च ।
यथा तथा दम्भ उपप्लवोऽयं धर्मेऽवसेयः सुविचारवद्भिः ॥५८॥

प्रयोजनं किं नु मुनिव्रतानां दम्भो यदेभिः परिषेवितव्यः ? ।
दम्भावकाशो नहि सत्प्रवृत्तावसत्प्रवृत्तौ पुनरुच्यते किम् ? ॥५९॥

एकान्ततो नानुमतिर्मुनीशां न वा निषेधोऽस्त्यपवादतस्तत् ।
क्वापि प्रसङ्गे नहि दम्भवृत्तिर्युक्ता विधातुं भयमस्ति कस्मात् ? ॥६०॥

अहो ! समालम्ब्य बकप्रवृत्तिं प्रवञ्चकैर्वञ्च्यत एष लोकः ।
परन्त्वमीभिः प्रविचारणीयं प्रवञ्चितः स्याद् निजचेतनोऽपि ॥६१॥

निःशल्यभावव्रतपालनस्योपदेशधारां ददिरे मुनीन्द्राः ।
एवं हि योगैकपदीप्रवेशः, किं भूरिणा, शास्त्ररहस्यमत्र ॥६२॥

लुण्टाक एकः खलु मोक्षमार्गे सम्प्रस्थितानां सुमहाशयानाम् ।
स लोभनाम्ना जगति प्रसिद्धो मोहस्य राज्ञः प्रथमः प्रधानः ॥६३॥

संसारमूलं किल लोभ एको मोक्षस्य मूलं तदभाव एकः ।
एतद्धि संसार-विमुक्तिमार्गदिग्दर्शनं योगबुधा अकार्षुः ॥६४॥

सुदुर्जयानां प्रथमोऽस्ति लोभस्तस्मिन् जिते किं न जितं त्रिलोक्याम्?
लोभस्य घाते हत एव मोहः क्रोधादिनाशेऽप्यवशिष्यतेऽसौ ॥६५॥

लोभोऽस्ति चिन्तालतिकासु कन्दो रक्षो गुणानां कवलीकृतौ च ।
महांश्च विघ्नः पुरुषार्थसिद्धौ जयत्यमुं सत्त्वसमुद्रचेताः ॥ ६६ ॥

चेत् सात्त्विकस्ते पुरुषाभिमानो लोकाग्रणीत्वे यदि चायियासा ।
स्फारं परिस्फारय तर्हि लोभ-वप्रं प्रभङ्क्तुं पुरुषार्थमुच्चैः ॥६७॥

ये स्वेच्छया पूरयितुं क्षमन्ते न शाकतोऽपि स्वककुक्षिरन्ध्रम् ।
आन्दोलितान्तःकरणा नृपश्री-प्रेप्सासमीरेण भवन्ति तेऽपि ॥६८॥

लोभार्दितः किं न करोति कष्टं लोभाऽऽहतः किं न करोति कर्म ?।
करोत्यनर्थं पितृ-बान्धवानामप्याशु लोभच्छुरिकाहताक्षः ॥६९॥

संक्लिश्य ये निष्करुणं प्रजातो धनं गृहीत्वा पुपुषुः स्वकोशम्।
भयङ्करं भूरि विधाय युद्धं प्रादर्शि यैश्च प्रलयावभासः ॥७०॥

लोभार्दितास्तेऽपि हि मृत्युकाले न किञ्चिदादातुमलंबभूवुः।
एकाकिनो रङ्कमुखाः प्रयातास्तस्मात् किमर्थं विदधीत लोभम् ?
॥७१॥ युग्मम्।

केनापि सार्धं न गता धरेयं लोभेन ताम्यन्ति वृथैव मन्दाः।
विवेकमाधाय विचार्यते चेत् सन्तोष एव प्रतिभाति सौख्यम् ७२।

न कर्त्तुमुद्योगमियं न वार्त्ता परन्तु लोभोत्थविकल्पधूमैः।
मनः सदा श्यामतया वृथैव कार्यं गृहस्थैरपि हन्त! कस्मात्॥७३॥

कृते प्रयासे प्रचुरेऽपि यन्न संसिद्धिमाप्नोति समीहितोऽर्थः।
सङ्क्लिश्यते तेन, परं विचार्यं यदस्मदीयं न हि तत् परेषाम्*॥७४॥

बहुप्रयत्नैरपि नार्थसिद्धिः कस्याप्ययत्नादपि कार्यसिद्धिः।
एतद् ध्रुवं कर्मबलं विचार्याऽनिष्टप्रसङ्गेऽपि न खेदवान् स्यात् ७५॥

क्रोधस्य रोधे प्रशमो बलीयान् मानाय शक्नोति पुनर्मृदुत्वम्।
मायां प्रहन्तुं प्रभुताऽऽर्जवस्य लोभस्य शत्रुः परितोष एकः ॥७६॥

क्रोधादिकाऽऽविर्भवनप्रसङ्गाः प्रागेव सञ्चिन्त्य विमोचनीयाः।
प्रसङ्गसम्प्राप्तकषायतायामुक्तानुपायांस्त्वरया भजेत ॥ ७७ ॥

सञ्जन्येत यथा यथाऽबलतया क्रोधादिभिर्दूषणैः
सञ्चेष्टेत तथा तथा शुभमतिस्त्यक्त्वा प्रमादस्थितिम्।
यः क्रोधादिविकारकारण उपप्राप्ते च नाऽऽक्षिप्यते
प्राप्तुं योगधराधरस्य शिखरं नासौ विलम्बक्षमः ॥ ७८ ॥

---

* अन्यदीयेन चतुर्थपादेन पूर्त्तिः।

पञ्चम-प्रकरणम् ।

ध्यानसामग्री ।

कषायरोधाय जितेन्द्रियत्वं जितेन्द्रियत्वाय मनोविशुद्धिः ।
मनोविशुद्ध्यै समता पुनः साऽममत्वतस्तत् खलु भावनाभिः ॥१॥

भीमाद् भवाम्भोनिधितो भयं चेत् तदेन्द्रियाणां विजये यतेत ।
सरित्सहस्राऽपरिपूर्यसिन्धु-मध्योपमोऽक्षप्रकरोऽस्त्यतृप्तः ॥ २ ॥

देहान्तदुःखं गजमीनभृङ्गपतङ्गसारङ्गकुलं प्रयाति ।
सुस्पष्टमेकैकहृषीकदोषात् का तर्हि सर्वाक्षरतस्य वार्त्ता ? ॥ ३ ॥

अतुच्छमूर्च्छार्पणशक्तिभाजां यदीन्द्रियाणां विजयो न जातः ।
भूमण्डलान्दोलनशक्तिभाजोऽप्योजस्विनः षण्ढतया वदामि ॥४॥

अन्तर्बलोद्भावनहेतुरेकः स इन्द्रियाणां विनियन्त्रितत्वम् ।
एतत्कृतेऽन्तःकरणस्य शोध आवश्यके यत्नमतीव कुर्यात् ॥५॥

भ्राम्यन् मनोरक्ष इहापशङ्कं भवावटे प्रक्षिपति त्रिलोकीम् ।
अराजको निःशरणो जनोऽयं त्राता ततः कोऽत्र गवेषणीयः ? ॥६॥

गार्हस्थ्यमुन्मुच्य महानुभावान् मुक्तिश्रिया आचरतस्तपांसि ।
वात्येव चेतश्चपलस्वभावमन्यत्र कुत्रापि परिक्षिपेद् द्राक् ॥ ७ ॥

मनोविशोधेन विनैव योगधराधरारोहणमीहते यः ।
प्रहस्यते पङ्गुरिव क्रमाभ्यां देशाटनं कर्त्तुमनाः स मूढः ॥ ८ ॥

रुद्धानि कर्माणि मनोनिरोधे मनःप्रचारे प्रसरन्ति तानि ।
असंयमः संयम एतदीयो भवस्य मोक्षस्य समस्ति मूलम् ॥९॥

जगत्त्रयीविभ्रमणप्रवीणो मनःप्लवङ्गो विनियन्त्रणीयः ।
केनापि यत्नेन विचारवद्भिर्निःश्रेयसं चेत् प्रतिपत्तुमिच्छा ॥१०॥

सर्वः प्रपञ्चः प्रतिपादितोऽयं मनोविशोधाय स वेदितव्यः ।
कर्मक्षयप्रत्यलमेकमुक्तं ध्यानं तदन्तःपरिशुद्धिमूलम् ॥ ११ ॥

प्रदीपिका योगपथप्रकाशे योगाङ्कुरप्रोद्भवकाश्यपी च ।
मनोविशुद्धिः प्रथमं विधेया प्रयासवैयर्थ्यममूं विना तु ॥१२॥

मनोविशुद्ध्यै समताऽवलम्ब्या निमज्जतां साम्यसरोवरे यत् ।
रागादिकम्लानिपरिक्षयः स्याद् अमन्द आनन्द उपेयते च ॥१३॥

आकृष्य चेतः समता क्षणं चेद् निषेव्यते तर्हि तदुद्भवं यत् ।
अन्तः सुखं संप्रसरीसरीति कः पारयेत् तद् वदितुं यथावत्? ॥१४॥

साम्याञ्जनं पूरितमस्ति यस्याऽन्तर्लोचने मोहतमःप्रणाशात् ।
स्वस्मिन् स्वरूपं परमेश्वरस्य पश्यत्यसौ निष्ठितसाध्यबिन्दुः॥१५॥

दूरे दिवः शर्म शिवं दवीयो यच्छं मनःसन्निहितं समत्वात् ।
शक्यं समास्वादयितुं स्फुटं तद्, इहैव मोक्षः समतारतस्य ॥१६॥

सुधाघनो वर्षति साम्यरूपो मनोभुवां यस्य मुनीश्वरस्य ।
संसारदावानलतीव्रतापोऽनुभूतिमास्कन्दति किं तदीयाम्? ॥१७॥

अन्यैः पदार्थैः सकलैर्विभिन्नमात्मा यदाऽऽत्मानमवैति सम्यक् ।
तदा समत्वं लभते प्रसूतिमशक्यलाभं विबुधेश्वराणाम् ॥ १८ ॥

संरक्षिते मोहमृगेश्वरेण भयङ्करे दोषसमूहसत्रे ।
समत्वरूपज्वलनार्चिषा ये दाहं ददुस्ते परिनिष्ठितार्थाः ॥१९॥

क्रूरा अपि प्राणभृतः परस्परं यद्दर्शनाच्छान्तिमवाप्नुवन्ति यत् ।
नान्यस्य कस्यापि समर्थताऽस्त्यसौ समत्वमेकं खलु तत्र जृम्भते ॥ २० ॥

अनित्यभावादिकभावनाः स्मृता महर्षिभिर्द्वादश, तास्वविश्रमम् ।
विभाव्यमानासु ममत्वलक्षणाऽन्धकारनाशे समताप्रभा स्फुरेत्॥२१।

यदिन्द्रियार्थैरनुभूयते शं यदेतदङ्गं विषयाः समग्राः ।
यद् दृश्यते चर्मदृशा तदेतद् अनित्यमेवास्ति समग्रमत्र ॥२२॥

महीपतिश्चक्रधरः सुरेश्वरो योगीश्वरो वा भुवनत्रयेश्वरः ।
सर्वेऽपि मृत्योरुपयान्ति गोचरं तदत्र कः स्याच्छरणं शरीरिणः?
॥ २३ ॥

भवोदधिर्जन्मजरावसान-पयःप्रपूर्णः स्मरवाडवश्च ।
मोहात्मकाऽऽवर्त्त-विपत्तिमत्स्यः कुतः सुखं सम्भवतीदृशीह?॥२४॥

एकाकिनः प्राणभृतो गतागतं कुर्वन्ति संसारवने भयङ्करे ।
अन्यार्थमुत्पाद्य धनं भवान्तरं प्रयात एकः परिपीड्यतेऽसुमान्
॥ २५ ॥

विलक्षणः सर्वबहिष्प्रपञ्चतः सच्चिन्महानन्दमयोऽस्ति चेतनः ।
इदं शरीरं स्फुटमन्यदात्मनः कस्तर्ह्यनन्यो भुवनेऽभ्युपेयते? ॥२६॥

द्वारैः स्रवद्भिर्नवभिः सदैवाऽशुचीन् घृणायाः पदमस्ति कायः ।
तथाप्यहो! तत्र यदस्ति शौचसंकल्पनं मोहविलास एषः ॥२७॥

मनोवचोभूघनकर्म योगाः स आस्रवः कर्मण आस्रवेण ।
शुभाशुभं कर्म शुभाशुभाद्धि योगान्निबध्नन्ति शरीरभाजः ॥२८॥

यथाम्बु गृह्णाति हि यानपात्रं छिद्रैस्तथा चेतन एष कर्म ।
योगाऽऽत्मरन्ध्रैरशुभैः शुभैर्वा निर्यात्यमुष्मिन् सति नो भवाब्धेः
॥ २९ ॥

निरोधनं यत् पुनरास्रवाणां तं संवरं योगिन ऊचिवांसः ।
विभावनादास्रव-संवरस्य भवादुदासीनतया मनः स्यात् ॥३०॥

स्यात् कर्मणां निर्जरणं च निर्जरा द्विधा सकामेतरभेदतः पुनः।
पाकः फलानामिव कर्मणामपि स्वतोऽप्युपायादपि सम्प्रजायते
॥ ३१ ॥

यथाऽस्ति जीवैश्च जडैश्च पूर्णो लोकोऽयमेवं परिचिन्तनं यत् ।
सा भावना लोकविचाररूपा मनोवशीकारफलप्रधाना ॥ ३२ ॥

जगत् समुद्धर्तुमनल्पदुःखपङ्कादहो ! कीदृश एष धर्मः ।
प्रादर्शि लोकोत्तरपूरुषैर्यत्सेवात आप्नोति महोदयत्वम् ॥ ३३ ॥

शाखे क्षमा मार्दवमार्जवं च शौचं च सत्यं तपसंयमौ च ।
त्यागस्तथाऽकिञ्चनता तथैव ब्रह्मेति धर्मो दशधा बभाषे ॥३४॥

सङ्क्लिष्टकर्मस्ववलीभवत्सु विशिष्टमेतन्नरजन्म लब्धम् ।
तत्राप्यहो! तत्त्वविनिश्चयात्म-श्रीबोधिरत्नं बहुदुर्लभत्वम् ॥३५॥

एतादृशीभिः खलु भावनाभिः सुवासितान्तःकरणो महात्मा ।
ममत्वलुण्टाकविलुण्ट्यमानां साम्यश्रियं रक्षितुमीश्वरः स्यात्॥३६॥

ध्यानं समालम्ब्य समत्वमाश्रयेत् साम्यं विना तत्र कृते विडम्बना ।
आत्मप्रबोधेन च कर्मसंक्षयो ध्यानेन साध्यः स च, तत् परं
हितम् ॥ ३७ ॥

ध्यानं समत्वेन विना भवेन्न साम्यं विना ध्यानमपि स्फुरेन्न ।
परस्परापेक्षणतस्ततस्तद् द्वयं भवेत् सुस्थिरताविशिष्टम् ॥३८॥

अतिदारुणपापभारिणोऽ
प्यमुना ध्वस्तसमस्तकर्मकाः ।
परमात्मदशां प्रपेदिरे
परमध्यात्ममिदं विदुर्बुधाः ॥ ३९ ॥

षष्ठ–प्रकरणम् ।

ध्यानसिद्धिः ।

स्यात् ज्ञानयोगोऽथ च कर्मयोग आवश्यकाऽऽचार इह द्वितीयः ।
शारीरिकस्पन्दनकर्मरूपः स कर्मयोगः शुभमातनोति ॥ १ ॥

शुद्धं तपः स्वात्मरतिस्वरूपं तं ज्ञानयोगं मुनयो वदन्ति ।
स उन्मनीभावत इन्द्रियार्थाद् निःश्रेयसश्रीप्रतिपादकः स्यात् ॥२॥

क्रियोच्चकोटीमुपजग्मुषां याऽनावश्यकी सा व्यवहारवृत्तौ ।
गुणावहाऽस्तीति परम्परातोऽपवर्गसम्पादकताऽक्षताऽस्याम् ॥३॥

अभ्यस्यतोऽपेक्षत एव सम्यक् क्रिया मनःशुद्धिकृतेऽस्खलन्ती ।
योगं समारूढवतो मुनेस्तु शमप्रवाहः परमात्मभूमौ ॥ ४ ॥

नैवाऽप्रमत्तर्षिमहोदयानामावश्यकाऽऽचारविधेयताऽस्ति ।
य आत्मतृप्तो यक आत्ममग्नो य आत्मतुष्टो न हि तस्य कर्म ॥५॥

मनः स्थिरीभूतमपि प्रयायाद् रजोबलाच्चञ्चलभावमाशु ।
प्रत्याहृतेर्निग्रहमातनोति ज्ञानी पुनस्तस्य गतप्रमादः ॥ ६ ॥

विलोलचित्तस्थिरतार्थमेव बद्धप्रयत्नः सततं मुनिः स्यात् ।
कुर्यादतो हेतुत एव शास्त्रोदितां क्रियां प्रत्यहमुच्चभावात् ॥७॥

सम्यक्त्वयाऽभ्यस्य च कर्मयोगमनन्यसाम्यं समुपाश्रितो यः ।
सदाऽप्युदासीनतया स्थितस्य न तस्य भोगैर्भवति प्रलेपः ॥८॥

नाऽऽप्य प्रियं हृष्यति नोद्विजेच्च प्राप्याऽप्रियं ब्रह्मविदुत्तमर्षिः ।
यः स्यात् समेक्षी विषमेऽपि जीवन्मुक्तं स्थिरं ब्रह्म तमीरयन्ति॥९॥

नहीन्द्रियार्थेषु यदाऽनुरज्येत् समस्तसङ्कल्पविमुक्तचेताः ।
योगे समारूढतया तदानीमसौ महात्मा परिवेदितव्यः ॥ १० ॥

भयोज्झितः सुस्थिरनासिकाग्रदृष्टिः प्रसन्नाननपुंडरीकः ।
श्लिष्टौष्ठयुग्मो रदनै रदांश्चाऽस्पृशन् सुसंस्थान इतप्रमादः ॥११॥

स्पृहाविमुक्तो निजभूवनेऽपि प्रभूतसंवेगसरोनिमग्नः ।
अमात्रकारुण्यपदं भवश्रीपराङ्मुखो हर्षयितेक्षमाणान् ॥ १२ ॥

एवंविधो निष्ठितकर्मयोगः श्रीज्ञानयोगेन समाहितात्मा ।
ध्याने प्रवेशं कुरुतेऽतिघोरकर्माटवीज्वालनदाववन्हौ ॥ १३ ॥

नारी-पशु-क्लीब-कुशीलवर्जितं स्थानं विविक्तं किमपि व्यपेक्षते ।
नानाऽऽसनानामपि यत् स्थिरं सुखं स्वस्याऽवभासेत तदेव साधयेत् ॥ १४ ॥

ध्यानाय कालोऽपि न कोऽपि निश्चितो यस्मिन् समाधिः समयः स शस्यते ।
ध्यायेन्निषण्णः शयितः स्थितोऽथवाऽवस्था जिता ध्यानविघातिनी न या ॥ १५ ॥

ध्यानस्य सिद्ध्यै दृढभावनानामावश्यकत्वं मुनयो वदन्ति ।
मैत्रीं प्रमोदं करुणामुपेक्षां युञ्जीत, तद् ध्यानमुपस्करोति ॥१६॥

सर्वेपि जीवाः सुखिनो भवन्तु मा कोपि पापाचरणानि कार्षीत् ।
विमुच्यतां विश्वमशेषमेतद्, एवं मतिं नाम वदन्ति मैत्रीम्॥१७॥

देदीप्यमाना गुणगौरवेण महाशया ये भुवनत्रयेऽपि ।
गुणेषु तेषां खलु पक्षपातो यस्तं प्रमोदं परिकीर्त्तयन्ति ॥१८॥

शोकाग्निना ये परिदह्यमानाः क्षुधा तृषाऽऽर्त्ताः सरुजो विभीताः।
तत्र प्रतीकारपरा मतिर्या कारुण्यभावः परिकीर्त्तिता सा ॥१९॥

क्रूराशया दारुणपापसक्ताः साधुद्विषः स्वस्य च शंसितारः ।
ये शिक्ष्यमाणा विकृतिं भजन्ते माध्यस्थ्यमीदृक्षु भवत्युपेक्षा ॥२०॥

ध्यानं पुनः स्याद् ध्रुवमामुहूर्त्ताद् एकाग्रसम्प्रत्ययलक्षणं तत् ।
आज्ञामपायं च विपाकमेवं संस्थानमालोचयतीह योगी ॥२१॥

आश्रित्य लोकोत्तरपूरुषाणामाज्ञामबाधां परिचिन्तनं यत् ।
वस्तुस्वरूपस्य यथार्थतात आज्ञाभिधं ध्यानमिदं वदन्ति ॥२२॥

बभाषिरे सर्वविदोऽतिसूक्ष्मं तत्त्वं न तत् तार्किकतर्कजालैः ।
विहन्यते तत् प्रतिपत्तियोग्यं नह्यन्यथा सर्वविदो वदन्ति ॥२३॥

अध्यात्ममार्गाऽऽश्रयणं विनाऽयमात्मा भवेऽभ्राम्यदनन्तकालम् ।
रागादिदोषैकवशीभवन्तो निर्यान्ति नापायमहाऽटवीतः ॥२४॥

मोहान्धकारप्रविलुप्तचेतसा नाऽकारि किं किं कलुषं मया हहा !।
श्वभ्रेषु तिर्यक्षु नरेषु चोल्बणं दुःखं न किं किं प्रतिपद्यते स्म च! ॥२५॥

गम्भीरसंसारमहाऽऽपदाजले कालो गतोऽयं ब्रुडतो ममाऽखिलः ।
कस्याऽपराधोऽत्र मया विचार्यते! प्रमाद पतस्य ममाऽपचेतसः॥२६॥

प्राप्याऽपि बोधिं परमां मनोवचःशरीरदुश्चेष्टिततो मयैव हि ।
स्वमस्तके ज्वालित आशुशुक्षणिः कोऽत्रापराधी परिभाव्यतेऽपरः?
॥ २७ ॥

स्वाधीनतायामपि मुक्तिवर्त्मनो भ्रान्त्या स्वयं पातित एष चेतनः।
भिक्षां यथाऽटेदुपलब्धराज्यको मोक्षे स्वतन्त्रेऽपि तथा भवभ्रमः
॥ २८ ॥

एवं हि रागादिकदूषणेभ्यो जाता अपायाः परिचिन्तनीयाः ।
यस्मिन्नुपाया अपि तत्प्रणाशे ध्यानं द्वितीयं तदपायनाम ॥२९॥

उदीरितः कर्मफलं विपाकः शुभाशुभत्वेन स च द्विभेदः ।
द्रव्यादियोगात् स च चित्ररूपोऽनुभूतिमास्कन्दति देहभाजाम्॥३०॥

द्रव्यैर्वधू-माल्य-सुभोजनाद्यैः शुभाऽशुभः शस्त्रविषानलाद्यैः ।
क्षेत्रे निवासेन महालयादौ शुभः श्मशानप्रभृतौ तदन्यः ॥३१॥

काले वसन्तप्रभृतावशीतानुष्णे शुभोऽन्यत्र विपर्ययश्च ।
मनःप्रसादप्रभृतौ च भावे शुभोऽशुभो रौद्रविकारभावे ॥ ३२ ॥

सुदेव-मर्त्यादिभवे शुभोऽसन्मनुष्यतिर्यङ्नरकादिकेऽन्यः ।
द्रव्यादियोगादिति चित्ररूपं विचिन्तयेत् कर्मफलं तृतीये ॥३३॥

आत्मप्रतिष्ठं स्थितमस्त्यनन्तानन्तं नभः सर्वत एव तत्र ।
लोकोऽस्ति मध्यस्थित ऊर्ध्व-मध्याऽधोभागतो यो दधते त्रिलोकीम् ॥ ३४ ॥

स्वरूपमेतस्य विचिन्तनीयं ध्याने चतुर्थे बहुसूक्ष्मरीत्या ।
स्यादीदृशे वृत्तवतां च धर्मध्याने स्वयंवेद्यमतीन्द्रियं शम् ॥३५॥

ध्यानादमुष्माच्च नृजन्मपूर्त्तौ महर्द्धिकं स्वर्गमवाप्नुवन्ति ।
पुनर्नृजन्म प्रतिपद्य चारु योगस्य मार्गे पथिकीभवन्ति ॥ ३६ ॥

ध्यानं शुक्लं ततस्ते परममुपगताः क्लिष्टकर्माणि हत्वा
लोकालोकावभासं निरतिशयमरं ज्ञानमासादयन्ति ।
धर्मं व्याख्यान्ति मोहान्धतमसहतये पर्षदि प्रस्फुरन्त्या-
मायुष्पूर्त्तौ ततः स्युः परमपदजुषः सच्चिदानन्दरूपाः ॥३७॥

सप्तम-प्रकरणम् ।

योगश्रेणी ।

मानसवृत्तिनिरोधं सम्प्रज्ञातेतरप्रकारतया ।
योगं वदन्ति तज्ज्ञा ध्यानविशेषोऽत्र च प्रथमः ॥ १ ॥

वृत्तिक्षयस्वरूपोऽसम्प्रज्ञातोऽस्ति, वृत्तयो मनसः ।
क्षीणा भवन्ति सर्वाः केवलबोधस्तदोदेति ॥ २ ॥

देहस्य वृत्तयः खलु यदा निरुद्धा भवन्ति तत्कालः ।
योगोऽसम्प्रज्ञाताद् न भिद्यते निर्वृतिद्वारम् ॥ ३ ॥

अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः ।
इत्येवमप्यनूचाना ऊचाना योगपद्धतिम् ॥ ४ ॥

इच्छा च शास्त्रं च समर्थता चेत्येषोऽपि योगो मत आदिमोऽत्र।
प्रमादतो ज्ञानवतोऽप्यनुष्ठाऽभिलाषिणोऽसुन्दरधर्मयोगः ॥ ५ ॥

श्रद्धान-बोद्धौ दधतः प्रकृष्टौ हतप्रमादस्य यथाऽऽत्मशक्ति ।
यो धर्मयोगो वचनानुसारी स शास्त्रयोगः परिवेदितव्यः ॥६॥

शास्त्रादुपायान् विदुषो महर्षेः शास्त्राऽप्रसाध्यानुभवाधिरोहः ।
उत्कृष्टसामर्थ्यतया भवेद् यः सामर्थ्ययोगं तमुदाहरन्ति ॥ ७ ॥

न सिद्धिसम्पादनहेतुभेदाः सर्वेऽपि शास्त्राच्छकनीयबोधाः ।
सर्वज्ञता तच्छ्रुतितोऽन्यथा स्यात् तत्प्रातिभज्ञानगतः स योगः॥८॥

तत् प्रातिभं केवलबोधभानोः प्राग्वृत्तिकं स्यादरुणोदयाभम् ।
'ऋतम्भरा' 'तारक' एवमादिनामानि तस्मिन्नवदन् परेऽपि ॥९॥

संन्यासरूपः स्मृत एष योगो धर्मस्तथा योग इति द्विधाऽसौ ।
तत्राऽऽदिमः स्यात् क्षपकावलिस्थे शैलेश्यवस्थावति च द्वितीयः
॥ १० ॥

असावयोगोऽपि मनोवचोङ्गव्यापाररोधात् सकलप्रकारैः ।
अवादि मुक्त्या सह योजनेन योगो भवाम्भोनिधिरोध एषः ॥११॥

अमुं च योगं समुपाजगन्वान् प्राप्नोति मोक्षं क्षणमात्र एव ।
सर्वज्ञभावावसरेऽवशिष्टकर्माणि हन्ति क्षणतो यदेषः ॥ १२ ॥

अनेन योगेन विकर्मकीसन् मुक्तो भवेत् तत्क्षणमस्तदेहः ।
मुक्तिश्च केत्येव गभीरप्रश्ने जैनेन्द्रमार्गेण समाधिरेषः ॥ १३ ॥

ऊर्ध्वं यथाऽलाबुफलं समेति लेपेऽपयाते सलिलाशयस्थम् ।
ऊर्ध्वं तथा गच्छति सर्वकर्मलेपप्रणाशात् परिशुद्ध आत्मा ॥१४॥

अयं स्वभावोऽप्युपगन्तुमर्हो यदूर्ध्वमात्मैति विकर्मकत्वे ।
ऊर्ध्वं प्रगच्छन्नवतिष्ठतेऽसौ क्षणेन लोकाग्रपदे परात्मा ॥ १५ ॥

ततोऽध आयाति न गौरवस्याऽभावाद् नचाग्रेऽप्यनुपग्रहत्वात् ।
नचास्ति तिर्यग्गतिसम्प्रयोक्ता लोकाग्र एव स्थितिरस्य युक्ता ॥१६।

महेश्वरास्ते परमेश्वरास्ते स्वयम्भुवस्ते पुरुषोत्तमास्ते ।
पितामहास्ते परमेष्ठिनस्ते तथागतास्ते सुगताः शिवास्ते ॥१७॥

स ईश्वरो हे बहुभागधेयाः ! स्ताद् वो मनोवारिरुहस्य हंसः ।
अयं हि पन्था अवधारणीयश्चैतन्यशक्तिप्रगतावनन्यः ॥ १८ ॥

आलम्बनं भवति यादृशमीदृगात्माऽऽ-
पत्तिर्निजात्मनि भवेदिति को न वेत्ति ? ।
आलम्बनं सकललोकपतिः परात्मा
संश्रीयते यदि तदा किमपेक्षणीयम् ? ॥ १९ ॥

अष्टम-प्रकरणम् ।

अन्तिमशिक्षा ।

अनन्तशक्तिं दधदेष चेतनः प्रवेदितुं तं यतते महोदयः ।
प्रकाशितेऽस्मिन् सकलं प्रकाशतेऽप्रकाशितेऽस्मिन् सकलं तमोमयम् ॥ १ ॥

मोहप्रणाशेन च तत्प्रकाशनं मोहप्रणाशोऽपि च तत्त्वचिन्तनात् ।
चिन्त्यं च नैर्गुण्यमिदं भवोदधेर्जगत् किमेतत् किमिदं सुखासुखम् ? ॥ २ ॥

वस्तुस्वरूपस्य विचिन्तनातो विवेकभासः प्रकटीभवन्ति ।
भवप्रपञ्चाद् विनिवृत्य सुस्थीभूयाऽन्तरीक्षाकरणेन चिन्ता ॥३॥

एकस्वभावा न हि सर्वलोका विचित्रकर्मानुसृतेर्भ्रमन्तः ।
आयुष्क-धी-शक्तिविचित्रतायामर्हन्ति सर्वेऽपि न मार्गमेकम् ॥४॥

समग्रसामग्र्यनुकूलताया न सम्भवः सर्वशरीरभाजाम् ।
न तेन सर्वेऽपि भवन्ति योग्याः साम्येन योगस्य पथेऽधिरोढुम् ॥५॥

कुर्याद् यथाशक्ति तथापि नूनं कर्त्तव्यमात्माभ्युदयानुपाति ।
शनैः शनैः सञ्चरणेऽपि मार्गे स्थानं चिरेणाऽप्युपलभ्यते हि ॥ ६ ॥

तत्त्वावबोधप्रविकासहेतोर्यस्य स्वभावो न विचारणायाः ।
यातानुयातस्य पृथग्जनस्य न तस्य वैराग्यमुदेति साधु ॥७॥

न साधुवैराग्यविवर्जितत्वेऽपवर्गमार्गे भवति प्रवेशः ।
एवं च मानुष्यमनर्थकं स्याद् विचारमभ्यस्यतु तेन सम्यक् ॥८॥

हिंसादिकं पापमिति प्रसिद्धं तत्र प्रवर्त्तेत न चेत् कदापि ।
ईशस्य कुर्याद् भजनं च तर्हि संसाधितं निश्चितमात्मकार्यम् ॥९॥

नवीनविज्ञानचमत्कृतानां न मोक्षशास्त्रेषु घृणा विधेया।
चित्रप्रयोगा बहवो भवन्तु न युज्यतेऽध्यात्मपथस्तु हातुम् ॥१०॥

जडेऽप्यनन्ता सममानि शक्तिरेवं च सम्यग्विहितप्रयोगैः।
आश्चर्यहेतुर्घटना भवेच्चेत् किं तर्हि युक्ता जडमोहलीला ? ॥ ११ ॥

सीमा न खल्वस्ति चमत्कृतीनां भूमण्डले चेत् कुशलः प्रयोक्ता।
परं च ताभिर्नहि कर्मसृष्टिर्व्याहन्यते शुष्यति नापि मोक्षः ॥१२॥

अवश्यमाविष्कृतयो भवन्तु महोपयोगा हि जनस्य सन्ति।
स्मृतेर्बहिः स्याद् न तु साध्यबिन्दुरात्माभिमुख्यं खलु सारमन्ते॥१३॥

इति सुबोधसुवासितमाशयं
कुरुत काङ्क्षत चात्मसमुन्नतिम्।
सति बलीयसि तत्र मनोरथे
प्रयतनं सुलभीभविता स्वतः ॥ १४ ॥

तदेवं सङ्क्षिप्तं गदितमिदमध्यात्मविषये
मया स्वल्पज्ञेनाऽपि परिदृढसंस्कारविधये।
समालोकिष्यन्ते किल सहृदयाः सादरदृशा
प्रबुद्धेऽस्मात् कस्मिंश्चन मम कृतार्थत्वमधिकम् ॥